੬੨

ਨਕਲ

Acc No 62

Digitized by Panjab Digital Library | www.panjabdigilib.org

62

ਭਾਗਵਤ ਮਾਹਾਤਮੰਯ:

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा.मा.
१





॥श्रीगणेशायनमः॥श्रीभागवतमाहात्म्यं
पद्मपुराणस्येदं॥यंप्रव्रजंतमनुपेतमपे
तकृत्यंद्वैपायनोविरहकातरआजुहा





रामः
१

Digitized by Panjab Digital Library | www.panjabdigilib.org

व॥ पुत्रेतितन्मयतयातरवोभिनेदुस्तंसर्वभूतहृदयंमुनिमान
तोस्मिं॥१॥नैमिषेसूतमासीनमभिवाद्यमहामतिं॥कथामृत
रसास्वादेकुशलःशौनकोऽब्रवीत॥२॥शौनकउवाच॥अज्ञान
ध्वांतविध्वंसकोटिसूर्यसमप्रभं॥सूताख्याहिकथासारंममकर्ण
रसायनं॥२॥भक्तिज्ञानविरागाप्तोविवेकोवर्द्धतेकथं॥मायामोह
निरासश्चवैष्णवैःक्रियतेकथं॥३॥इहघोरेकलौप्रायोजीवश्चासु
रतांगतः॥क्लेशाक्रांतस्यतस्यैवशोधनेकिंपरा[illegible]णं॥४॥श्रेयसां
यद्भवेच्छ्रेयःपावनानांचपावनं॥कृष्णप्राप्तिःकथंशश्वत्साधनंतद्व
दाधुना॥५॥चिंतामणिर्लोकसुखंसुरद्रुःस्वर्गसंपदं॥प्रयच्छतिगुरुः

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा॰मा
२

प्रीतोवैकुंठंयोगिदुर्लभं॥६॥सूतउवाच॥प्रीतिःशौनकचित्तेते
ह्यतोवच्मिविचार्य्यच॥सर्वसिद्धांतनिष्पन्नंसंसारभयनाशनं
७॥भक्त्योघवर्द्धनंयच्चकृष्णसंतोषहेतुकं॥तदहंतेभिधास्यामि
सावधानतयाशृणु॥८॥कालमालमुखग्रासत्रासनिर्नाशहे
तवे॥श्रीमद्भागवतंशास्त्रंकलौकारेणभाषितं॥९॥एतस्मादप
रंकिंचिन्मनःशुद्धौनविद्यते॥जन्मांतरेभवेत्पुण्यंतदाभागवतं
लभेत्॥१०॥परीक्षितेकथांवक्तुंसभायांसंस्थितेशुके॥सुधाकुं
भंगृहीत्वैवदेवास्तत्रसमागताः॥११॥शुकंनत्वावदन्सर्वेस्वका
र्य्यकुशलाःसुराः॥कथांसुधांप्रयच्छस्वगृहीत्वैवसुधामिमां॥१२

रामः
२

Digitized by Panjab Digital Library | www.panjabdigilib.org

एवंविनिमयेजातेसुधाह्येतत्त्रतीयतां ॥ प्रपास्यामोवयंसर्वे
श्रीमद्भागवतामृतं ॥१३॥ क्वसुधाक्वकथालोकेक्वकाचःक्वम
णिर्महान् ॥ ब्रह्मरातोविचार्येतितदादेवान्जहासह ॥१४॥ अ
भक्तांस्तांश्चविज्ञायनददौसकथामृतं ॥ श्रीमद्भागवतीवार्त्ता
सुराणामतिदुर्लभां ॥१५॥ राज्ञोमोक्षंतथावीक्ष्यपुराधातापिवि
स्मितः ॥ सत्यलोकेतुलांबध्वातोलयत्साधनान्यजः ॥१६॥ लघू
न्यन्यानिजातानिगौरवत्वादिदंमहत् ॥ तदाऋषिगणासर्वे
विस्मयंपरमंययुः ॥१७॥ मेनिरेभगवद्रूपंशास्त्रंभागवतंक्षितौ
पठनाच्छ्रवणात्सद्योवैकुंठफलदायकं ॥१८॥ सप्ताहेनश्रुतंचै

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा॰मा॰ ३

तत्सर्वथामुक्तिदायकं॥सनकाद्यैःपुराप्रोक्तंनारदायदयापरैः
॥१९॥सद्यपिब्रह्मसंबंधाच्छ्रुतमेतत्सुरर्षिणा॥सप्ताहश्रवणे
विधिःकुमारैस्तस्यभाषितः॥२०॥शौनकउवाच॥लोकविग्र
हयुक्तस्यनारदस्यास्थिरस्यच॥विधिःश्रवेकुतःप्रीतिःसंयोगः
कुत्रतैःसह॥२१॥सूतउवाच॥अत्रतेकथयिष्यामिभक्तिपुष्टिक
थानकं॥शुकेनममयत्प्रोक्तंरहःशिष्यंविचार्यच॥२२॥एकाद
पिविशालायांचत्वारऋषयोऽमलाः॥सत्संगार्थंसमायाताद
दृशुस्तत्रनारदं॥२३॥कुमाराऊचुः॥कथंब्रह्मन्दीनमुखःकुत
श्चिंतातुरोधुना॥त्वरितंगम्यतेकुत्रकुतश्चागमनंतव॥२४॥

राम: ३

इदानीं शून्यचित्तोसि गतवित्तो यथाजनः॥ तदेवं मुक्त संगास्स नो
चित्तं वद कारणं॥२५॥ नारद उ० ॥ अहंतु पृथिवी यातो ज्ञात्वा
सर्वोत्तमामिति॥ पुष्करं च प्रयागं च काशीं गोदावरी तथा॥२६॥
हरिक्षेत्रं कुरुक्षेत्रं श्रीरंगं सेतुबंधनं॥ एवमादिषु तीर्थेषु भ्रम
माण इतस्ततः॥२७॥ नापश्यं कुत्रचिद्धर्मं मनःसंतोषहेतुकं
॥कालिना धर्ममित्रेण धरेयं बाधिताधुना॥२८॥ सत्यं नास्ति
तपः शौचं दया दानं न विद्यते॥ उदरंभरिणो जीवा वराकाः कू
ट भाषिणः॥२९॥ मंदाः सुमंदा मतयो मंदभाग्या ह्युपद्रुताः
पाषंडनिरताः संतो विरक्ताः सपरिग्रहाः॥३०॥ तरुणी प्रभुता

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा·मा·
४

गेहेश्वपालकोवृद्धिदायकः॥ कन्यायाविक्रयोस्मोभाद्दंपतीनां
चकल्कचं॥ २१॥ आश्रमायवनेरुद्धास्तीर्थानिसरितस्तथा॥ दे
वतायतनान्यत्रदुष्टैर्नष्टानिभूरिशः॥ २२॥ नयोगीनैवसिद्धो
वानज्ञानीसत्क्रियोनरः॥ कलिदावानलेनाद्यसाधनंभस्मतां
गतः॥ २३॥ अट्टशूलाजनपदाःशिवशूलाद्विजातयः॥ कामि
न्यःकेशशूलिन्यःसंभवंतिकलाविह २४ एवंप्रपश्यन्कलेर्दो
षान्पर्य्यटन्नवनीमहं॥ यामुनंतरमापन्नोयत्रलीलाहरेर
भूत॥ २५॥ तत्राश्चर्य्यंमयादृष्टंश्रूयतांतन्मुनीश्वराः॥ एका
तुतरुणीतत्रनिषन्नाखिन्नमानसा॥ २६॥ वृद्धौवृद्धौपतितौप

राम:
४

Digitized by Panjab Digital Library | www.panjabdigilib.org

श्वे निश्वसंतावचेतनौ ॥ शुश्रूषंतीप्रबोधंतीरुदंतीचतयोःपु
रः ॥ ३७ ॥ दशदिक्षुनिरीक्षंतीरक्षितारंनिजंपुनः ॥ वीक्षमा
नाशातस्त्राभिर्वीक्षमानामुहुर्मुहुः ॥ ३८ ॥ दृष्ट्वादूरात्ततःसो
हंकौतुकेनतदंतिकं ॥ मांदृष्ट्वाचोत्थितावालाविकलाचाब्र
वीद्वचः ॥ ३९ ॥ वालोवाच ॥ भोभोसाधोक्षणंतिष्ठमच्चिंतामपि
नाशय ॥ दर्शनंतवलोकस्यसर्वथाघहरंपरं ॥ ४० ॥ वहुधात
ववाक्येनदुःखशांतिर्भविष्यति ॥ यदाभाग्यंभवेद्भूरिभवतोद
र्शनंतदा ४१ ॥ नारदउवाच ॥ काचत्वंकाविमौचेमानार्यःका
पद्मलोचना ॥ वददेविसविस्तारंस्वस्यदुःखस्यकारणं ॥ ४२ ॥

Digitized by Panjab Digital Library | www.panjabdigilib.org

॥बालोवाच॥ अहं भक्तिरिति ख्याता इमौ मे तनयौ मतौ
ज्ञानवैराग्यनामानौ कालयोगेन जर्जरौ॥४३॥ गंगाद्याः स
रितः श्रीमामत्सेवार्थसमागता॥ तथापि न च मे श्रेयः सेवि
ताः सुरैरपि॥४४॥ इदानीं शृणु मद्वार्त्तां सचित्तस्त्वं तपोधन॥
वार्त्ता मे वितताप्यस्ति तां श्रुत्वा सुखमावह॥४५॥ उत्पन्ना द्र
विडे साहं वृद्धिं कर्णाटके गता॥ क्वचित्क्वचिन्महाराष्ट्रे गुर्ज्जरे
जीर्णतां गता॥४६॥ तत्र घोरकलेर्योगात्पाषंडैः खंडितांग
का॥ दुर्बलाहं चिरं जाता पुत्राभ्यां सह मंदतां॥४७॥ वृंदावनं पु
नः प्राप्य नवीनसुतरूपिणी॥ जाताहं युवती सम्यक्श्रेष्ठरूप.

नुसांप्रतं ॥४८॥ इमौतुशापितावत्रसुतौमेक्लिष्टरूपतः अमात ॥ इदंस्थानंपरित्यज्यविदेशंगम्यतेमया ॥४९॥ जरठत्वंसमाजातौतेनदुःखेनदुःखिता ॥ साहंतुतरुणीकस्मात्सुतौवृद्धाविमौकुतः ॥५०॥ त्रयाणांसहचारित्वाद्वैपरीत्यंकुतस्थितं ॥ घटतेजठरामातातरुणौतनयाविति ॥५१॥ अतःशोचामिवात्मानंविस्मयाविष्टमानसा ॥ वदयोगनिधेचामन्कारणंचात्रकिंभवेत् ॥५२॥ नारदउवाच ॥ ज्ञानेनात्मनिपश्यामिसर्वमेतत्तवानघे ॥ नविषादस्त्वयाकार्योहरिःशंतेकरिष्यति ॥५३॥ सूतउवाच ॥ क्षणमात्रेणतज्ज्ञा

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा॰मा॰
६

त्वा वाक्यमूचे मुनीश्वरः ॥ शृणु घ्यावहिता वाले युगोयं दारुणः कलिः ॥ ५४ ॥ तेन लुप्ताः सदाचारा योगमार्गस्तपांसि च जना अघासुरायंते शाठ्ये दुःकर्मकारिणः ॥ ५५ ॥ इह संतो विषीदंति प्रहृष्यंतो वचासतः ॥ धत्ते धैर्यं तयो धीमान् स धीरः पंडितोथवा ॥ ५६ ॥ अस्पृश्यानवलोक्येयं शेषभारकरी धरा वर्षे वर्षे क्रमाज्जाता मंगलं नापि दृश्यते ॥ ५७ ॥ न त्वामपि सुतैः साकं कोपि पश्यति सांप्रतं ॥ उपेक्षितानुरागांधैर्जर्जरत्वेन संस्थिता ॥ ५८ ॥ वृंदावनस्य संयोगात्पुनस्त्वं तरुणी नवा ॥ धन्यं वृंदावनं तेन भक्तिर्नृत्यति यत्र च ॥ ५९ ॥ अत्रेमौ ग्राहकौ ना॰

रामः
६

भावान्नजहामपिमुंचतः॥ किंचिदात्मसुखेनेहप्रसुप्तिर्मन्य
तेनयोः॥६०॥ भक्तिरुवाच॥ कथंपरीक्षिताराज्ञास्थापितो
ह्यशुचिःकलिः॥ प्रवृत्तेतुकलौसर्वसारःकुत्रगतोमहान्॥६
१॥ करुणापरेणहरिणाप्यधर्मःकथमीक्ष्यते॥ इमंमेसंशयं
छिंधित्वद्वाचासुखितास्म्यहं॥६२॥ नारदउवाच॥ यदिपृष्टः
स्त्वयाबालेप्रेमतःश्रवणंकुरु॥ सर्वंवक्ष्यामिभद्रंतेकश्मलं
गतमिष्यति॥६३॥ यदामुकुंदोभगवान्क्ष्मांत्यक्त्वास्वपदं
गतः॥ तद्दिनात्कलिरायातःसर्वसाधनसाधकः॥६४॥ दृष्टो
दिग्विजयेराज्ञादीनवच्छरणंगतः॥ नमयामारणीयोयंसा

रंगइवसारभुक् ॥ ६५ ॥ यत्फलं नास्ति तपसा न योगेन समा-
धिना ॥ तत्फलं लभते सम्यक् कलौ केशवकीर्त्तनात् ॥ ६६ ॥
यथाकारं कलिं दृष्ट्वा सारवत्सारनीरसं ॥ विष्णुरातः स्था-
पितवान् कलिजानां सुखाय च ॥ ६७ ॥ कुकर्माचरणात्सारः स-
र्वतो निर्गतोधुना ॥ पदार्थाः संस्थिता भूमौ बीजहीना यथा तु-
षाः ॥ ६८ ॥ विप्रैर्भागवती वार्त्ता गेहे गेहे जने जने ॥ कारिता नि-
जलोभेन कथासारस्ततो गतः ॥ ६९ ॥ अत्युग्रभूरिकर्माणो
नास्तिका रौरवा जनाः ॥ तेपि तिष्ठंति तीर्थेषु तीर्थसारस्ततो
गतः ॥ ७० ॥ कामक्रोधमहामोहतृष्णाव्याकुलचेतसः ॥ तेपि

Digitized by Panjab Digital Library | www.panjabdigilib.org

तिष्ठंतितपसितपः सारस्ततोगतः ॥ ७१ ॥ मनसश्चाजयाल्लोभाद्दं
भात्पाषंडसंश्रयात् ॥ शास्त्रानभ्यसनाच्चैव ध्यानयोगफलंगते
७२ ॥ पंडितास्तु कलत्रेण रमंतेमहिषाइव ॥ पुत्रोत्पादनदक्षास्ते
नदक्षामुक्तिसाधने ॥ ७३ ॥ नहिवैष्णवता क्वापिसंप्रदायपुरःस
रं ॥ एवंप्रणयतांप्राप्तोवस्तुसारंस्थलेस्थले ॥ ७४ ॥ अयंतुयुग
धर्मोहिवर्त्ततेकस्यदूषणं ॥ अतस्तुपुंडरीकाक्षः सहितेनिकट
स्थितः ॥ ७५ ॥ सूतउवाच ॥ इतितद्वचनंश्रुत्वाविस्मयंपरमंग
ता ॥ भक्तिरूचेवचोभूयः श्रूयतांतच्चशौनक ॥ ७६ ॥ सुरर्षेत्वंच
धन्योसिमद्भाग्येनसमागतः ॥ साधूनांदर्शनंलोकेसर्वसिद्धिक

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा॰मा॰
८

रंपरं ॥७७॥ इहानंदो यथा मे स्यात्तथोपायस्त्वयोच्यतां ॥ योगे
श्वस्यापि ते ब्रह्मन्नासाध्यं वर्त्तते धुना ॥७८॥ त्यजति जगति मा
यां यस्य कायाधवस्ते वचनरचनमेकं केवलं चाकलय्य ॥ ध्रु
वपदमपि यातो यत्कृपातो ध्रुवोयं सकलकुशलपात्रं ब्रह्म
पुत्रं नतोस्मि ॥७९॥ इति श्री पद्मपुराणे उत्तरखंडे श्री भागवत
माहात्म्ये भक्तिनारदसमागमो नाम प्रथमोध्यायः ॥१॥ नारद उ
वाच ॥ वृथा खेदयसे बाले अहो चिंतातुरा कथं ॥ श्री कृष्णच
रणांभोजं स्मर दुःखं गमिष्यति ॥१॥ द्रौपदी च परित्राता येन
कौरवकश्मलात् ॥ पालिता गोपसुंदर्यः स कृष्णः क्वापि नो ग

रामः
८

Digitized by Panjab Digital Library | www.panjabdigilib.org

तः॥२॥त्वंतुभक्तिःप्रियायस्यसततंप्राणतोधिकं॥त्वयाहू
तोपिभगवान्यातिनीचगृहेष्वपि॥३॥सत्यादित्रियुगेबोध
वैराग्यौमुक्तिसाधकौ॥कलौतुकेवलंभक्तिर्ब्रह्मसायुज्य
कारिणी॥४॥इतिनिश्चित्यचिद्रूपःसद्रूपांत्वांससर्जह॥पर
मानंदचिन्मूर्त्तिःसुंदरींकृष्णवल्लभां॥५॥बध्वांजलिंत्वयापृ
ष्टंकिंकरोमीतिचैकदा॥त्वांतदाज्ञापयत्कृष्णोमद्भक्तान्पो
षयेतिच॥६॥अंगीकृतंत्वयातद्वैप्रसन्नोभूद्धरिस्तदा॥मु
क्तिंदासींददौतुभ्यंज्ञानवैराग्यकाविमौ॥७॥पोषणंतेनरू
पेणवैकुंठेप्रकरोषिच॥भूमौभक्तविशोकायछायारूपंत्व

Digitized by Panjab Digital Library | www.panjabdigilib.org

याकृतं॥८॥मुक्तिंज्ञानंविरक्तिंचसहकृत्वागताभुवि॥कृता
दिद्वापरस्यांतमहानंदेनसंहिता॥९॥कलौमुक्तिःक्षयंप्राप्ता
पाषंडामयपीडिता त्वदाज्ञयागताशीघ्रंवैकुंठंपुनरेवसा॥
१०॥स्मृतात्वयापिचात्रैवमुक्तिरायातियातिच॥पुत्रीकृत्य
त्वयेमौचपार्श्वेस्वस्यैवरक्षितौ॥११॥उपेक्षितःकलौमंदौ
वृद्धौजातौसुतौतव॥तथापिचिंतांमुंचत्वमुपायंचिंतया
म्यहं॥१२॥कलिनासदृशःकोपियुगोनास्तिवरानने॥तस्मिं
स्त्वांस्थापयिष्यामिगेहेगेहेजनेजने॥१३॥अन्यधर्मांस्ति
रस्कृत्यपुरस्कृत्यमहोत्सवान्॥तदानाहंहरेर्दासोलोकेत्वां

नप्रवर्त्तये॥१४॥त्वदृन्चिताश्च येजीवा भविष्यंति कलाविह।
पापिनोपिगमिष्यंति निर्भयाः कृष्णमंदिरं॥१५॥येषांचित्ते
वसेद्भक्तिःसर्वदाप्रेमरूपिणी॥नतेपश्यंति कीनाशंस्वप्ने
प्यमलमूर्त्तयः॥१६॥नप्रेतोनपिशाचोवाराक्षसोवासुरो
पिवा॥भक्तियुक्तमनस्कानांस्पर्शनेपिप्रभुर्भवेत्॥१७॥न
तपोभिर्नवेदैश्चनज्ञानेनापिकर्मणा॥हरिर्हिसाध्यतेभक्त्या
प्रमाणंतत्रगोपिकाः॥१८॥नृणांजन्मसहस्रेणभक्तौप्रीति
हिजायते॥कलौभक्तिमतांशश्वद्भक्त्याकृष्णःपुरःस्थितः।
१९॥भक्तिद्रोहकरायेचतेसीदंतिजगत्त्रये॥दुर्वासादुःखमा

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा·मा· पन्नःपुराभक्तिविनिंदकाः ॥२०॥ अलंव्रतैरलंतीर्थैरलंयो
१० गैरलंमखैः ॥ अलंज्ञानकथालापैर्भक्तिरेकैवमुक्तिदा ॥२१ सूतउ·
इतिनारदनिर्णीतंस्वमाहात्म्यंनिशम्यसा ॥ सर्वांगपुष्टियु
क्तानारदंवाक्यमब्रवीत ॥२२॥ भक्तिरुवाच ॥ अहोनार
दधन्योसिप्रीतिस्तेमयिनिश्चला नकदाचिद्विमुंचामिचि
त्तेस्थास्यामिसर्वदा ॥२३॥ कृपालुनात्वयासाधोमद्बाधा
ध्वंसिताक्षणात ॥ पुत्रयोश्चेतनंनास्तिततोबोधयबोधय
२४ ॥ सूतउवाच ॥ तस्यावचःसमाकर्ण्यकारुण्यंनारदो रामः
गतः ॥ तयोर्बोधनमारेभेकराग्रेणविमर्दयन ॥२५॥ मुखं १०

Digitized by Panjab Digital Library | www.panjabdigilib.org

संयोज्यकर्णंति श्रावृमुच्चैः समुच्चरन्न ॥ ज्ञानप्रवुध्यतां शीघ्रं
वैराग्यत्वं विवुध्यतां ॥ २६ ॥ वेदाववदंति घोषैश्च गीतापाठैर्मु
हुर्मुहुः ॥ वो ध्यमानौ तदानेन कथंचिदुत्थितो वलात् ॥ २७ ॥
नेत्रैरनवलोकंतौ ज़ंभंतौ सालसावुभौ ॥ वकवत्पलितौ प्रायः
शुष्ककाष्टसमांगकौ ॥ २८ ॥ चुन्हामौ तौ निरीक्ष्यैव पुनः स्वा
पपरायणौ ॥ ऋषिश्चिंतातुरो जातः किं विधेयं मयेति च २९
अहो निद्रा कथं याति वृद्धत्वं च महत्तरं ॥ चिंतयन्निति गोविं
दं स्मरयामास भार्गव ॥ ३० ॥ व्योमवाणी तदैवाभून्मा ऋषे
खिद्यतामिति ॥ उद्यमः सफलस्ते तु भविष्यति न संशयः ॥ ३१

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा·मा·
११

एतदर्थेतुसत्कर्मसुरर्षेत्वंसमाचर॥ तत्तेकर्माभिधास्यंतिसा
धवःसाधुभूषणाः॥२२॥सत्कर्मणिकृतेतस्मिन्सानिद्रावृद्ध
तानयोः॥गमिष्यतित्त्वणाद्भक्तिःसर्वतःप्रसरिष्यति॥२३॥
इत्याकाशवचःस्पष्टंतत्सवैरपिविश्रुतं॥नारदोविस्मयंले
भेनेदंज्ञातमितिब्रुवन्॥२४॥नारदउवाच॥अनयाकाशा
वाण्यापिगोप्यत्वेननिरूपितं॥किंवातत्साधनंकार्यंयेनका
र्यंभवेत्तयोः॥२५॥क्वभविष्यंतितेसंतःकथंदास्यंतिसाध
नं॥मयात्रकिंप्रकर्त्तव्यंयदुक्तंव्योमभाषया॥२६॥सूतउवा
च॥तत्रतावद्वयसंस्थाप्यनिर्गतोनारदोमुनिः॥तीर्थंतीर्थं

रामः
११

Digitized by Panjab Digital Library | www.panjabdigilib.org

विनिष्क्रम्यप्रछन्नमार्गेण्ऋषीन्चरन॥३७॥वृतांतःश्रूयते
सर्वैःकिंचिन्निश्चितमनोच्यते॥असाध्यंकेचनप्रोचुर्दुर्ज्ञेयमि
तिचापरे॥३८॥मूकीभूतास्तथान्येतुकियंतस्तुपलायि
ताः॥हाहाकारोमहानासीत्त्रिलोकेविस्मयावहः॥३९॥वेद
वदंतिघोषैश्चगीतापाठैर्विबोधितं भक्तिज्ञानविरागानां
नोदृतिष्टत्रिकंयदा॥४०॥उपायोनापरोस्तीतिकर्णेकर्णेज
पन्जनाः॥योगिनानारटेनापिस्वयंनज्ञायतेतुयत्॥४१॥
तत्कृपयंशक्यतेवक्तुमितरैरिहमानुषैः॥एवंऋषिगणैःप्र
ष्टेनिर्णीतोक्तंदुरासदं॥४२॥ततश्चिंतातुरःसोथवदरीवन

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा॰मा॰
१२

मागतः॥तपश्चरामिचात्रेतितदर्थंकृतनिश्चयः॥४३॥ता
वद्ददर्शपुरतःसनकाद्यान्मुनीश्वरान्॥कोटिसूर्यसमा
भासानुवाचमुनिसत्तमः॥४४॥नारदउवाच॥इदानींभू
रिभाग्येनभवद्भिःसंगमाप्स्थितः॥कुमारावदतांशीघ्रंकृपां
कृत्वाममोपरि॥४५॥भवंतोयोगिनःसर्वेबुद्धिमंतोवहुश्रु
ताः॥पंचहायनसंयुक्ताःसर्वेषामपिपूर्वजाः ४६ सदावैकुं
ठनिलयाहरिकीर्त्तनतत्पराः॥लीलामृतरसोन्मत्ताःकथा
मात्रैकजीविनः॥४७॥हरिःशरणमेवंहिनित्यंतेषांमुखेवचः
अतःकालसमादिष्टाजरायुष्मान्नवाधते॥४८॥तेषांभ्रूभं

रामः
१२

Digitized by Panjab Digital Library | www.panjabdigilib.org

गमात्रेण द्वारपालौ हरेः पुरा भूमौ निपतितौ सद्यो यत्कृपा
तः परं गतौ ॥ ४९ ॥ अहो भाग्यस्य योगेन दर्शनं भवतामिह ॥ अ
नुग्रहस्तु कर्त्तव्यो मयि दीने दयापरैः ॥ ५० ॥ अशरीरगिरोक्तं
यत्तत्किं साधनमुच्यते अनुष्ठेयं कथं तावत्प्रब्रुवंतु सवि
स्तरं ॥ ५१ ॥ भक्तिज्ञानविरागाणां सुखमुत्पद्यते कथं स्था
पनं सर्ववर्णेषु प्रेमपूर्वं प्रयत्नतः ॥ ५२ ॥ सनत्कुमार उवाच
मा चिंतां कुरु देवर्षे हर्षं चित्ते समावह ॥ उपायः सुखसाध्योत्र
वर्त्तते पूर्वमेव हि ॥ ५३ ॥ अहो नारद धन्योसि विरक्तानां शि
रोमणिः ॥ सदा श्रीकृष्णदासानामग्रणी योगभास्करः ॥ ५४

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्वयि चित्रं न मंतव्यं भक्तस्य धर्ममनुवर्त्तिनि ॥ घटते कृष्णदास
स्य भक्तेः स्थापनता सदा ॥ ५५ ॥ ऋषिभिर्वहवो लोके पंथा
नः प्रकटीकृताः ॥ श्रमसाध्याश्च ते सर्वे प्रायः स्वर्गफलप्रदा
५६ ॥ वैकुंठः साधकः पंथाः स तु गोप्यो हि वर्त्तते ॥ तस्योपदेष्टा
पुरुषः प्रायो भाग्येन लभ्यते ॥ ५७ ॥ सत्कर्म तव निर्दिष्टं व्योम
वाचा भवत्पुरा ॥ तदुच्यते शृणुष्वाद्य स्थिरचित्तः प्रसन्नधी
५८ ॥ द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ॥ स्वाध्यायज्ञान
यज्ञाश्च ते तु कर्मविसूचकाः ॥ ५९ ॥ सत्कर्मसूचको नूनं ज्ञान
यज्ञः स्मृतो वुधैः ॥ श्रीमद्भागवतालापः संगीतो हि शुकादिभिः

Digitized by Panjab Digital Library | www.panjabdigilib.org

६०॥ भक्तिज्ञानविरागाणां तत् घोषेण वलं महत्॥ व्रजिष्यति द्व
योः कष्टं सुखं भक्तेर्भविष्यति॥ ६१॥ प्रलयं हि गमिष्यंति श्रीमद्भा
गवतध्वनेः॥ कलिदोषा इमे सर्वे सिंहशब्दाद्वृका इव॥ ६२॥ ज्ञान
वैराग्यसंयुक्ता प्रेमभक्ती रसावहा॥ प्रतिगेहं प्रतिजनं ततः क्री
डां करिष्यति॥ ६३॥ नारद उवाच॥ वेदवेदांतघोषैश्च गीतापा
ठैर्हि वोधितं भक्तिज्ञानविरागाणां नोदतिष्टत्त्रिकं तु यत्॥ ६४
श्रीमद्भागवतालापात्कथं वा वोधमेष्यति॥ तत्कथासु च वेदा
र्थः श्लोके श्लोके पदे पदे॥ ६५॥ छिंदंतु संशयं नूनं भवंतोमोघ
दर्शीनाः॥ विलंवो नात्र कर्त्तव्यः शरणागतवत्सलाः॥ ६६॥ कुं

माराऊचुः॥ वेदोपनिषदांसाराज्जाताःभागवतीकथा। अत्यु
त्तमांततोभातिपृथग्भूताफलाकृतिः॥६७॥ आमूलाग्रंरस
स्तिष्ठन्नाग्रेणस्वदतेयथा संभूयसपृथग्भूतःफलेविश्वम
नोहरं॥६८॥ यथादुग्धेस्थितंसर्पिर्निस्वादायोपकल्पते पृ
थग्भूतंहितद्गव्यंदेवानांरसवर्द्धनं॥६९॥ इक्षूणामादिमध्यां
तंशर्कराव्याप्यतिष्ठति॥ पृथग्भूताचसामिष्टातथाभागव
तीकथा॥७०॥ इदंभागवतंनामपुराणंब्रह्मसंमितं॥ भक्ति
ज्ञानविरागाणांस्थापनायप्रकाशितं॥७१॥ वेदांतवेदसुस्ना
तेगीतायाअपिकर्त्तरि॥ परितापवतिव्यासेमुह्यत्यज्ञानसाग

Digitized by Panjab Digital Library | www.panjabdigilib.org

रे ॥ ७२ ॥ तदा त्वया पुरा प्रोक्तं चतुःश्लोकसमन्वितं ॥ तदीयश्र
वणात्सद्यो निर्बाधो बादरायणः ॥ ७३ ॥ तत्र ते विस्मयः केन
यतः प्रश्नं करोभवान् ॥ श्रीमद्भागवतश्रावे शोकदुःखविना
शनं ॥ ७४ ॥ नारद उवाच ॥ यद्दर्शनं च विनिहंत्यशुभानि स
द्यः श्रेयस्तनोति भवदुःखदवार्दितानां ॥ निःशेषशेषमुख
गीतकथैकपानाः प्रेमप्रकाशकृतये शरणं गतोस्मि ॥ ७५
भाग्योदयेन बहुजन्मसमार्जितेन सत्संगमेव लभते पुरु
षो यदा वै ॥ अज्ञानहेतुकृतमोहमहांधकारनाशं विधाय
हि तदोदयते विवेकः ॥ ७६ ॥ इति श्री पद्मपुराणे उत्तरखं

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा॰मा॰
१५

डे श्रीभागवतमाहात्म्ये निरूपणे कुमारनारदसमागमो नाम
द्वितीयोध्यायः॥२॥ नारद उवाच॥ ज्ञानयज्ञं करिष्यामि शुक
शास्त्रकथोज्ज्वलं॥ भक्तिज्ञानविरागाणां स्थापनार्थं प्रय
त्नतः॥१॥ कुत्रकार्योमयायज्ञः स्थलंतद्वाच्यतामिह॥ महि
माशुकशास्त्रस्य वक्तव्यो वेदपारगैः॥२॥ कियद्भिर्दिवसैः श्रा
व्या श्रीमद्भागवतीकथा॥ कोविधिस्तत्रकर्त्तव्यो ममेदं वदता
मितः॥३॥ कुमारा ऊचुः॥ शृणुनारद वक्ष्यामविनम्रायविवे
किने॥ गंगाद्वारसमीपेतुतटमानंदनामकं॥४॥ नानाऋषि
गणैर्जुष्टं देवसिद्धनिषेवितं॥ नानातरुलताकीर्णं नवकोम

राम:
१५

Digitized by Panjab Digital Library | www.panjabdigilib.org

लवालुकं ॥५॥ रम्यमेकांतदेशस्थं हेमपद्मसुसौरभं ॥ यत्स
मीपस्थजीवानां वैरं चेतसि न स्थितं ॥६॥ ज्ञानयज्ञस्त्वया तत्र
कर्त्तव्यो हि प्रयत्नतः अपूर्वरससूपा च कथा तत्र भविष्यति
॥७॥ पुरस्थं निर्वलं चैव जराजीर्णकलेवरं ॥ तद्द्वयं च पुरस्कृ
त्य भक्तिस्तत्रागमिष्यति ॥८॥ यत्र भागवती वार्त्ता तत्र भक्त्या
दिकं व्रजेत ॥ यथाशवृंसमाकर्ण्य तंत्रं तत्करुणायते ॥९॥ सू
तउवाच ॥ एवमुक्त्वा कुमारास्ते नारदेन समं ततः ॥ गंगातटं
समाजग्मुः कथापानाय सत्वराः ॥१०॥ यदा यातास्तटं ते तु त
दा कोलाहलोप्यभूत ॥ भूर्लोके देवलोके च ब्रह्मलोके तथैव

तत्रिकंत

भा॰मा॰
१६

च॥११॥श्रीभागवतपीयूषपानायरसलंपटाः धावंतोप्या
ययुःसर्वेप्रथमंयेचवैष्णवाः॥१२॥भृगुर्वशिष्टश्च्यवनश्च
गौतमोमेधातिथिर्देवलदेवरातौ॥रामस्तथागाधिसुतश्च
साकलोमृकंडपुत्रात्रिजपिप्पलादयः॥१३॥योगेश्वराव्या
सपराशरौशुकोह्यंगिराजाजलिजह्नुमुख्याः॥सर्वेप्यमी
मुनिगणाःसहमित्रपुत्रस्वस्त्रीभिरीयुस्त्वतिप्रकणाद्राः
१४॥वेदांतानिचवेदाश्चमंत्रास्तंत्राःसमूर्त्तयः॥अष्टादश
पुराणानिषट्शास्त्राणितदाययुः॥१५॥गंगाद्याःसरितस्त
त्रपुष्करादिसरांसिच॥क्षेत्राणिचदिशःसर्वदंडकादिवन

एयपुरतिप्रणये
नयुक्ता =४ इतिपाठ

रामः
१६

नागादयो ९=

निच ॥ नागलोकापयुस्तत्र देवगंधर्वकिन्नराः ॥ गुरुत्वात्त
त्रनायाताभृगुःसोवोधमचानयत ॥ १७ ॥ दीप्तितेनारदेनाथ
दत्तमासनमुत्तमं कुमारावंदिताःसर्वैः ब्रह्मविद्यासुतत्प
राः ॥ १८ ॥ वैष्णवाश्चविरक्ताश्चन्यासिनोब्रह्मचारिणः ॥ मुख्य
भागेस्थितास्तेचतदग्रेनारदःस्थितः ॥ १९ ॥ एकभागेऋ
षिगणास्तथान्यत्रदिवौकसः ॥ वेदोपनिषदोन्यत्रतीर्थान्य
न्यत्रचस्त्रियः ॥ २० ॥ जयशब्दोनमःशब्दःशंखशब्दस्तथैव
च ॥ लाजाचूर्णप्रसूनानांक्षेपणःसुमहानभूत ॥ २१ ॥ वि
मानाग्र्यंसमारुह्यकियंतोदेवनायकाः ॥ कल्पवृक्षप्रसूनै

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा॰मा॰
७

श्च सर्वे तत्र समाकिरन् ॥ २२ ॥ सूत उवाच ॥ एवं ते षु च कश्चि
त्तेषु श्रीमद्भागवतस्य च ॥ माहात्म्यमूचिरे तस्मै नारदायम
हात्मने ॥ २३ ॥ कुमारा ऊचुः ॥ अथ ते संप्रवक्ष्यामो महिमा शु
कशास्त्रजः ॥ यस्य स्मरणमात्रेण मुक्तिः करतले स्थिता ॥
२४ ॥ सदा सेव्या प्रयत्नेन श्रीमद्भागवती कथा ॥ यस्याः श्रव
णमात्रेण हरिश्चित्तं समाश्रयेत् ॥ २५ ॥ ग्रंथोष्टादश साह
स्रो द्वादशस्कंधसंमितः ॥ परीक्षिच्छुकसंवादः शृणु भाग
वतं च तत् ॥ २६ ॥ तावत्संसारचक्रेस्मिन् भ्रमते ज्ञानतः पु
मान् ॥ यावत्कर्णगता नास्ति शुकशास्त्रकथा क्षणं ॥ २७ ॥ किं

माहा॰
७

श्रुतैर्वक्तृभिः शास्त्रैः पुराणैश्च भ्रमावहैः ॥ एवं भागवतं शा
स्त्रं मुक्तिदानेन गर्जति ॥ २८ ॥ कथा भागवतस्यापि नित्यं भ
वति यद्गृहे ॥ तद्गृहं तीर्थरूपं हि वसतां पापनाशनं ॥ २९ ॥
अश्वमेधसहस्राणि वाजपेयशतानि च ॥ शुकशास्त्रक
थायाश्च कलां नार्हंति षोडशीं ॥ ३० ॥ तावत्पापानि देहेस्मि
न्निवसंति तपोधन ॥ यावन्न श्रूयते सम्यक् श्रीमद्भागव
ती कथा ॥ ३१ ॥ न गंगा न गया काशी पुष्करं न प्रयागकं ॥
शुकशास्त्रकथायाश्च फलेन समतां नयेत् ॥ ३२ ॥ श्लोका
र्द्धं श्लोकपादं वा नित्यं भागवतोद्भवं ॥ पठस्व स्वमुखेनैव

Digitized by Panjab Digital Library | www.panjabdigilib.org

यदीछसिपरांगतिं ॥२३॥ वेदादिर्वेदमाताच पौरुषंसूक्त
मेवच ॥ त्रयीभागवतंचैव द्वादशाक्षरमेवच ॥२४॥ द्वाद
शात्मा प्रयागश्चः कालःसंवत्सरात्मकः ब्राह्मणाश्चाग्नि
होत्रंचसुरभिर्द्वादशी तथा ॥२५॥ तुलशीचवसंतश्च पुरु
षोत्तमएवच एतेषांतत्वतःप्राज्ञैर्नपृथग्भाव इष्यते ॥२६॥
योतुभागवतंशास्त्रंवाचयेदर्थतोनिशं ॥ जन्मकोटिकृतं
पापंनश्यत्यत्रनसंशयः ॥२७॥ श्लोकार्द्धंश्लोकपादंवाप
ठेद्भागवतंतुयः ॥ नित्यंपुण्यमवाप्नोति राजसूयाश्वमेधय
योः ॥२८॥ उक्तंभागवतंनित्यंकृतंचहरिचिंतनं ॥ तुलशीपो

Digitized by Panjab Digital Library | www.panjabdigilib.org

षणां चैव धेनूनां सेवनं समे ॥३९॥ अंतकाले तु येनैव श्रूय
ते शुकशास्त्रवाक् ॥ प्रीत्या तस्मै च वैकुंठं गोविंदोपि प्रयच्छति
४०॥ हेमसिंहयुतं चैव वैष्णवाय ददाति यः ॥ कृष्णेन सह सायु
ज्यं स पुमांल्लभते ध्रुवं ॥४१॥ आजन्मनाशमपि येन कृतं न
किंचिद्वित्तं निधाय शुकशास्त्रकथानपीता ॥ चांडालवच्च खर
वद्धत तेन नीतं मिथ्यास्वजन्मजननीजनिदुःखभाजा ॥४
२॥ जीवन्शवो निगदितः स तु पापकर्मा येनाश्रुतं शुककथा
वचनं न किंचित् ॥ धिक्कृतं नरं पशुसमं भुविभाररूपमेवं वदं
ति दिवि देवसरोजमुख्याः ॥४३॥ दुर्लभैव कथा लोके श्रीमद्भा

Digitized by Panjab Digital Library | www.panjabdigilib.org

गवतोद्भवा ॥ कोटिजन्मसमुत्थेन पुण्येनैव तु लभ्यते ॥ ४४ ॥
तेनं योगनिधे धीमन् श्रोतव्यासा प्रयत्नतः ॥ दिनानां निय
मो नास्ति सर्वदा श्रवणं मतं ॥ ४५ ॥ सत्येन ब्रह्मचर्येण श्रद्ध
या श्रवणं स्मृतं ॥ अशाक्यत्वात्कलौ बोध्यो विशेषोत्र शुका
त्तया ॥ ४६ ॥ मनसश्चजयाद्रोगात् पुंसां चैवायुषः क्षयात् ॥ क
लेर्दोषबहुत्वाच्च सप्ताहं श्रवणं मतं ॥ ४७ ॥ मनोवृत्तिजय
श्चैव नियमाचरणं तथा ॥ दीक्षां कर्तुं च शक्यास्यात् सप्ताहश्र
वणे ह्यतः ॥ ४८ ॥ अबुद्धातः श्रवणे नित्यमाद्यं तावधि यत्फ
लं ॥ तत्फलं शुकदेवेन सप्ताहश्रवणे कृतं ॥ ४९ ॥ यत्फलं ना

स्तितपसा न योगेन समाधिना अनायासेन तत्सर्वं सप्ताह
श्रवणे लभेत् ॥५०॥ यज्ञाद्गर्जति सप्ताहः सप्ताहो गर्जति व्र
तात् ॥ तपसो गर्जति प्रोच्चैस्तीर्थान्नित्यं हि गर्जति ॥५१॥ योगा
द्गर्जति सप्ताहो ध्यानाज्ज्ञानाच्च गर्जति ॥ किं ब्रूमो गर्जनं तस्य
रे रे गर्जति गर्जति ॥५२॥ शौनक उवाच ॥ आश्चर्यमेतत्क
थितं कथानां ज्ञानादि धर्मान्विगणय्य सांप्रतं ॥ निःश्रेयसे
भागवतं पुराणं जातं कुतो योगकृतादिसूचकं ॥५३॥ सूत उ
वाच ॥ यदा कृष्णो धरां त्यक्त्वा स्वपदं गंतुमुद्यतः ॥ एकादशे
परिश्रुत्याप्युद्धवो वाक्यमब्रवीत् ॥५४॥ उद्धव उवाच ॥ त्वं

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा॰मा॰ तुयास्यसिगोविंदभक्तकार्यंविधायच॥मच्चित्तेमहतीचिं
२० तांत्यक्त्वासुखमावह॥५५॥आगतोयंकलिर्घोरोभविष्यंति
पुनःखलाः॥तत्संगेनैवसंतोपिगमिष्यंत्युग्रतांतदा॥५६॥ परं
तदाभारावतीभूमिर्गोरूपेयंकमाश्रयेत॥अन्योनदृश्यते
त्रातात्वत्तःकमललोचन॥५७॥अतःसत्सुदयांकृत्वाभक्त
वत्सलेमाव्रज॥भक्तार्थंसगुणोसित्वंनिराकारोपिचिन्मयः
५८॥त्वद्वियोगेनतेभक्तानहिस्यास्यंतिभूतले॥निर्गुणोपा
सनेकष्टमतःकिंचिद्विचारय॥५९॥इत्युद्धववचःश्रुत्वाप्रभा रामः
सेचिंतयद्धरिः॥भक्तावलंवनापायिकिंविधेयंमयेतिच॥६० २०

Digitized by Panjab Digital Library | www.panjabdigilib.org

स्वकीयंयद्भवेत्तेजस्तद्वैभागवतेदधात्॥तिरोधायप्रविष्टो
यंश्रीमद्भागवतार्णवः॥तेनेयंवाङ्मयीमूर्त्तिःप्रत्यक्षावर्त्तते
हरेः॥सेवनाच्छ्रवणाद्ध्यानात्पठनात्पापनाशिनी॥६२॥स
प्ताहश्रवणंतेनसर्वेभ्योप्यधिकंकृतं॥साधनानितिरस्कृत्य
कलौधर्मोयमीरितः॥६३॥दुःखदारिद्र्यदौर्भाग्यपापानिस
कलानिच॥कामक्रोधजयार्थंहिकलौधर्मोयमीरितः॥६४
अन्यथावैष्णवीमायादेवैरपिसुदुस्त्यजा कथंत्याज्याभ
वेत्पुंभिःसप्ताहोतःप्रकाशितः॥६५॥एवंचसप्ताहश्रूनोरु
धर्मेप्रकाश्यमानेऋषिभिःसभायां॥आश्चर्यमेकंसमभू

Digitized by Panjab Digital Library | www.panjabdigilib.org

प्रेमैकरूपा २

भा॰मा॰ २१ तदानींतैरुच्यतेस्मंशृणुशौनकत्वं ॥ ६६ ॥ भक्तिःसुतौतौत
रुणौगृहीत्वासेयंचताभ्यांसहसाविरासीत् ॥ श्रीकृष्णगोविं
दहरेमुरारेनाथेतिनामानिमुहुर्वदंति ॥ ६७ ॥ तांचागतांभा
गवतार्थभूषांसुचारुवेषांददृशुःसदस्याः ॥ कथंचभोभोक
थमागतेयंमध्येमुनीनामितितर्कयंतः ॥ ६८ ॥ ऊचुःकुमारा
वचनंतदानींकथार्थतोनिःपतिताधुनेयं ॥ एवंगिरःसास
सुतानिशम्यसनत्कुमारादिषुचाहनम्रा ॥ ६९ ॥ भक्तिरुवाच
भवद्भिरद्यैवकृतास्मिपुष्टाकलिप्रनष्टापिकथारसेन ॥ राम:
क्वाहंतुतिष्ठाम्यधुनाब्रुवंतुब्रह्मन्निदंतांसुखमूचिरेते ॥ ७० ॥ २१

Digitized by Panjab Digital Library | www.panjabdigilib.org

भक्तेषुगोविंदस्वरूपधर्त्रीप्रेमैककर्त्रीभवरोगहर्त्री॥सात्वं
चंतिष्ठस्वसुधैर्य्यसंश्रयानिरंतरंवैष्णवमानसानि॥७१॥
ततोहिदोषाःकलिजाइमेत्वांद्रष्टुंनशक्ताःप्रभवोपिलोके
एवंतदाज्ञावसरेपिभक्तिस्तदानिषण्णाहरिदाससचित्ते॥७२
सकलभुवनमध्येनिर्द्धनास्तेपिधन्यानिवसतिहृदियेषांश्री
हरेर्भक्तिरेका॥हरिरपिनिजलोकंसर्वथातोविहायप्रविशति
हृदितेषांभक्तिसूत्रोपबद्धः॥७३॥ब्रूमोद्यतेकिमधिकंम
हिमानमेवंब्रह्मात्मकस्यभुविभागवताभिधस्य॥यत्संश्र
यान्निगदितेलभतेपिवक्ताश्रोताचकृष्णसमतामलमन्यध

भा॰मा॰
२२

मै:॥७४॥ इतिपद्म[illegible]णेभ[illegible]रखंडे श्रीभागवतमाहा
त्म्ये भक्तिकष्ठनिवर्त्तनोनामतृतीयोध्यायः॥३॥सू
तउवाच॥ अथवैष्णवचित्तेषुदृष्ट्वाभक्तिमलौकिकीं॥
निजलोकंपरित्यज्यभगवान्भक्तवत्सलः॥१॥वनमाली
घनश्यामःपीतवाससमनोहरः कांचीकलापरुचिरोल्लस
न्मुकुटकुंडलः॥२॥त्रिभंगललितश्चारुकौस्तुभेनविराजि
तः॥कोटिमन्मथलावण्योहरिचंदनचर्चितः॥३॥परमानं
दचिन्मूर्त्तिर्मधुरोमुरलीधरः॥आविवेशसुभक्तानांहृद
यान्यमलानिच॥४॥वैकुंठवासिनोयेचवैष्णवाउद्धवादयः

राम:
२२

Digitized by Panjab Digital Library | www.panjabdigilib.org

तत्कथाश्रवणार्थाय गूढरूपेण संस्थिताः ॥ ५ ॥ तदा जय
जयारावो रसपुष्टिरलौकिकी ॥ चूर्णप्रसूनवृष्टिश्च मुहुः शं
खरवोप्यभूत ॥ ६ ॥ तत्सभायां स्थितानां च देहगेहात्मविस्मृ
तिः ॥ दृष्ट्वा च तन्मयावस्थां नारदो वाक्यमब्रवीत ॥ ७ ॥ अ
लौकिकोयं महिमा मुनीश्वराः सप्ताह जन्माद्य विलोकितो
मया ॥ मूढाः श्वपाकाः पशुपक्षिणोत्र सर्वेपि निःपापतया
विभांति ॥ ८ ॥ अतो नृलोके ननु नास्ति किंचिच्चित्तस्य शोध
यकलौ पवित्रं ॥ अघौघविध्वंसकरी यथैव कथासमाने
भुवि नास्ति चान्यत ॥ ९ ॥ के के विशुध्यंति वदंतु मह्यं सप्ताह

भा॰मा॰
२२

पड़्तेनकथामयेन॥ कृपालुभिर्लोकहितंविचार्य्यप्रकाशि
तःकोपिनवीनमार्गः॥१०॥ कुमारऊचुः॥ येमानवाःपाप
कृतोपिसर्वदादुष्टादुराचाररवतोविमार्गाः॥ क्रोधाग्निदग्धा
ःकुटिलाश्चकामिनःसप्ताहयज्ञेनकलौपुनंति॥११॥ सत्ये
नहीनाःपितृमातृदूषकाःतृष्णाकुलाश्चाश्रमधर्मवर्जि
ताः॥ येदांभिकामत्सरिणोपिहिंसकाःसप्ताहयज्ञेनकलौ
पुनंतिते॥१२॥ पंचोग्रपापाःछलछद्मकारिणःक्रूराःपि
शाचाइवनिर्दयाश्चये॥ ब्रह्मस्वपुष्टाअभिचारकारिणः
सप्ताहयज्ञेनकलौपुनंतिते॥१३॥ कायेनवाचामनसापि

रामः
२२

पातकंनित्यंप्रकुर्वंतिशठाहठेनये॥परस्वपुष्टामलिना
दुराशयाःसप्ताहयज्ञेनकलौपुनंतिते॥१४॥अत्रतेकथ
यिष्यामश्चेतिहासंपुरातनं यस्यश्रवणमात्रेणपापहा
निःपरंभवेत्॥१५॥तुंगभद्रातटेपूर्वमभूत्पत्तनमुत्तमं॥
यत्रवर्णाःस्वधर्मेणसत्यसत्कर्मतत्पराः॥१६॥आत्मदेवः
पुरेतस्मिन्सर्ववेदविशारदः॥श्रौतसत्रेषुसंश्नातोद्वितीय श्रौ·तस्मार्तेषु
इवभास्करः॥भिक्षुकोपित्तवान्लोकेतत्प्रियाधुंधुलीस्मृ निस्नातो ४=
ता॥स्ववाक्यस्थापिकानित्यंसुंदरीसुकुलोद्भवा॥१७॥लोक
रता वार्त्ताधिंकाक्रूराप्रायशोवहुजल्पका॥शूराचगृहकृत्येषुकृ

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा॰मा॰
२५

पणाकलहप्रिया॥१९॥एवं निवसतोः प्रेमणा दंपत्योरन
पत्ययोः॥ अर्थाः कामास्तयोरासन्न सुखाय गृहादिकं॥२०
पश्चाद्धर्माः समारब्धास्ताभ्यां संतानहेतवे॥ गोभूहिरण्य
वासांसि दीनेभ्यो यच्छतोः सदा॥२१॥ धनार्थं धर्ममार्गेण
ताभ्यां नीतं तथापि च॥ न पुत्रो नापि वा पुत्री ततश्चिंतातुरो
भृशं॥२२॥ स एकदा द्विजो दुःखाद्गृहात्स्वकागतो वनं॥ म
ध्याह्ने तृषितो जातस्तडागं समुपेयिवान्॥२३॥ पीत्वा ज
लं निषण्णस्तु प्रजादुःखेन कर्षितः॥ मुहूर्त्तादपि तत्रैव संन्या
सी कश्चिदागतः॥२४॥ दृष्ट्वा पीतजलं तं तु विप्रो यातस्तदं

राम:
२५

Digitized by Panjab Digital Library | www.panjabdigilib.org

तिकं॥नत्वाचपादयोस्तस्यनिःश्वसन्संस्थितःपुरः॥२५॥प
तिरुवाच॥कथंरोदिषिविप्रत्वंकातेचिंतेचिंतावलीयसी।
सत्यंचवदमह्यंत्वंस्वस्वदुःखस्यकारणं॥२६॥ब्राह्मणउवा
च॥किंब्रवीमिऋषेदुःखंपूर्वपापेनसंचितं॥मदीयपूर्वजा
स्तोयंकवोष्णमुपभुंजते॥२७॥मद्दत्तंनैवगृह्णंतिप्रीत्यादे
वाद्विजातयः॥प्रजादुःखेनशून्योहंप्राणांस्त्यक्तुमिहागतः
२८॥धिग्जीवितंप्रजाहीनंधिक्प्राणांश्चप्रजांविना॥धिग्ध
नंचानपत्यस्यधिक्कुलंसंततिंविना॥२९॥पाल्यतेयामया
धेनुःसावंध्यासर्वथाभवेत्॥योमयारोपितोवृक्षःसोपिवं

Digitized by Panjab Digital Library | www.panjabdigilib.org

ध्यत्वमाश्रयेत ॥२०॥ अफलं मनुहायातं शीघ्रं तत्त्वविशुद्ध्य
ति ॥ निर्भाग्यस्यानपत्यस्य किमतो जीवितेन मे ॥२१॥ इत्युक्त्वा
सरुरोदोच्चैस्तत्पार्श्वे दुःखपीडितः ॥ तद्दृात तस्य यतेश्चित्ते धी
रताभूद्गरीयसी ॥२२॥ तज्ज्ञालाच्छरमालां च वाचयामास
योगवित ॥ सर्वं ज्ञात्वा यतिः पश्चाद्द्विप्रमूचे सविस्तरं ॥२३॥
यतिरुवाच ॥ शृणु विप्र मयाते द्यप्रारब्धं च विलोकितं स
प्तजन्मावधि तव पुत्रो नैव च नैव च ॥२४॥ मुंचाज्ञानं प्रजा
रूपं वलिष्ठा कर्मणो गतिः ॥ विवेकं तु समाश्रित्य त्यज संसा
रवासनां ॥२५॥ संततेः संभवं दुःखं पालनोपाधयस्तथा ॥

Digitized by Panjab Digital Library | www.panjabdigilib.org

विमुंचाद्यकुटुंबाशांसंन्यासं सर्वथा सुखं ॥ ३६ ॥ ब्राह्मण उवा
च ॥ विवेकेन भवेत्किं मे पुत्रं देहि बलादपि ॥ नो चेत्त्यजाम्यहं प्रा
णांस्त्वदग्रे चेति मूर्छितः ॥ ३७ ॥ पुत्रादिसुखहीनोयं संन्यासः
शुष्क एव हि ॥ गृहस्थः सरसो लोके पुत्रपौत्रसमावृतः ॥ ३८ ॥
इति विप्राग्रहं दृष्ट्वा प्राब्रवीत्स तपोधनः ॥ चित्रकेतुकृतं कष्टं
विधिलेखं विमार्जयन् ॥ ३९ ॥ नयास्यति सुखं पुत्रात्तथा दैवह
तोद्यमः ॥ अतो हठेन युक्तोसि ह्यर्प्पिनि किं वदाम्यहं ॥ ४० ॥ त
स्याग्रहं समालोक्य फलमेकं तु दत्तवान् ॥ इदं भक्षय पत्नौ
त्वं ततः पुत्रो भविष्यति ॥ ४१ ॥ सत्यं शोचं दयादानमेकभक्तं

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा॰मा॰
२६

तुभोजनं ॥ वर्षावधिस्त्रियाकार्यंतेनपुत्रोतिनिर्मलः ॥ ४२
एवमुक्त्वाययौयोगीविप्रस्तुगृहमागतः ॥ पत्न्याःपाणौ
फलंदत्त्वास्वयंयातस्तुकुत्रचित् ॥ ४३ ॥ तरुणीकुटिला
तस्यासख्याग्रेतुरुरोदह ॥ अहोचिंताममोत्पन्नाफलंचान
यभक्षये ॥ ४४ ॥ फलभक्ष्येणगर्भःस्याद्गर्भेणोदरवृद्धि
ता ॥ स्वल्पभक्ष्यंततोशक्तिर्गृहकार्यंकथंभवेत् ॥ ४५ ॥ दै
वाद्धाटीव्रजेद्ग्रामेपलायेद्गर्भिणीकथं ॥ शुकवद्वद्वसेद्ग
र्भस्तंकुक्षेःकथमुत्सृजेत् ॥ ४६ ॥ तिर्यक्त्वेदागतोगर्भस्त
दामेमरणंभवेत् ॥ प्रसूतौदारुणंदुःखंसुकुमारीकथंस

रामः
२६

Digitized by Panjab Digital Library | www.panjabdigilib.org

हे॥४७॥मंदायांमयिसर्वस्वंननंदासंग्रहेत्तदा॥सत्यश्रौ
चादिनियमोदुराराध्यःसदृश्यते॥४८॥लालनेपालनेदु
:खंप्रसूतायाश्चविद्यते॥वंध्यावाविधवानारीसुखि
नीचेतिमेमतिः॥४९॥एवंकुतर्कयामाससतत्फलंनापि
भक्षितं॥पत्सापृष्टाफलंभुक्तंभुक्तंचेतितयेरितं॥५०॥
एकदाभगिनीतस्यातद्गृहंस्वेच्छयागता॥तदग्रेकथि
तंसर्वंचिंतेयंमनसीतिमे॥५१॥दुर्वलातेनदुःखेनह्यनु
जेकरवाणिकिं॥साब्रवीन्ममगर्भोस्तितंददामिप्रसू
तिनः॥५२॥तावत्कालेसगर्भेवगुप्तातिष्ठगृहेसुखं॥त्र

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा॰मा॰
३७

तस्त्वंमत्पतेर्यच्छसतेदास्पतिवालकं ॥५३॥षाण्मासि-
कोमृतोवाल इतिलोकेवदिष्यति॥तंवालंपोषयिष्यामि
नित्यमागत्यतेगृहं॥५४॥फलंभक्षयधेनोस्त्वंपरीक्षार्थं
तुसांप्रतं॥तत्तदाचारितंसर्वंतथैवस्त्रीस्वभावतः॥५५॥
अल्पकालेनसानारीप्रसूतावालकंतदा॥आनीयजन
कोवालंरहस्येधुंधुलीददौ॥५६॥ददौदानंद्विजातिभ्यो
जातकर्मविधायच॥गीतवादित्रघोषोऽभूत्तद्द्वारेमंग
लंवहु॥५७॥तयाचकथितंभर्त्रेप्रसूतःसुखमर्भकः॥लो
कस्यसुखमुत्पन्नमात्मदेवप्रजोदयात्॥५८॥भर्त्रेसा

रामः
३७

Digitized by Panjab Digital Library | www.panjabdigilib.org

ब्रवीद्वाक्यंस्तन्यंनास्तिकुचेमम ॥ अन्यस्तन्येननिर्दुग्धि
कथंपुष्णामिबालकं ॥ ५९ ॥ मत्स्वसायाप्रसूतायामतो
बालस्तुवर्त्तति ॥ तामाकार्यगृहे रक्षासातेर्भपोषयिष्य
ति ॥ ६० ॥ पतिनातत्कृतंसर्वंपुत्ररक्षणहेतवे ॥ पुत्रस्यधुं
धुकारीतिनाममात्राप्रतिष्ठितं ॥ ६१ ॥ त्रिमासेनिर्गतेचाथ
साधेनुःसुषुवेर्भकं ॥ सर्वांगसुंदरंदिव्यंनिर्मलंकनकप्रभं
६२ ॥ दृष्ट्वाप्रसन्नोविप्रस्तुसंस्कारान्स्वयमादधे ॥ मत्वाश्च
र्यंजनाःसर्वेदिदृक्षार्थंसमागताः ॥ ६३ ॥ भाग्योदयोधुना
जातआत्मदेवस्यपश्यत ॥ धेन्वासुतंतुगोकर्णंप्रसूत ।

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा.मा. मितिकौतुकं॥नज्ञातंतद्रहस्यंतुकेनापिविधियोगतः॥गो
२८ कर्णंचसुतंदृष्ट्वागोकर्णंनामचाकरोत्॥६५॥कियत्काले
नतौजातौतरुणौतनयौतयोः गोकर्णःपंडितोज्ञानीधुं
धुकारीमहाखलः॥६६॥स्नानशौचक्रियाहीनोदुर्भक्षोवृद्ध
क्रोधनः॥दुःपरिग्रहकर्त्ताचसमहस्तेनभोजनी॥६७॥चौ
रःसर्वजनद्वेषीपरवेश्मप्रदीपकः॥लालनायार्भकान्धृ
त्वासद्यःकूपेनिपातयेत्॥६८॥हिंसकःशस्त्रधारीचदी
नांधानांप्रपीडकः॥चांडालाभिरतोनित्यंपाशहस्तश्वसं रामः
गतः॥६९॥तेनवेश्याकुसंगेनपैत्रंवित्तंतुनाशितं॥एकं २८

Digitized by Panjab Digital Library | www.panjabdigilib.org

दापितरौताउग्रपात्राणिस्वयमाहरत ॥७०॥ तत्पिताकृप
णंःप्रोच्चैर्द्धनिहानोरुरोदह ॥ वंधत्वंचसमीचीनंकुपुत्रोदुः
खदायकः ॥७१॥ क्कतिष्टामिक्कगच्छामिकोमेदुःखंव्यपोह
येत् ॥ प्राणांस्त्यजामिदुःखेनहाकष्टंममसंस्थितं ॥७२॥ त
दानीतुसमागत्यगोकर्णोज्ञानसंयुतः ॥ बोधयामासज
नकंवैराग्यंपरिदर्शयन् ॥७३॥ असारःखलुसंसारोदुःख
रूपीविमोहकः ॥ कःसुतःकस्यचधनंस्नेहवान्ज्वलनोनिशं ॥
७४॥ नचेंद्रस्यसुखंकिंचिन्नसुखंचक्रवर्तिनः ॥ सुखमेवविर
क्तस्यमुनेरेकांतजीविनः ॥७५॥ मुंचाज्ञानंप्रजारूपंमोहतो

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा॰मा॰
२९

नरकेगतिः॥ यावत्तिष्टतिदेहोयंसर्वंत्यक्त्वावनंव्रज॥७६
तद्वाक्यंतुसमाकर्ण्यगंतुकामःपिताब्रवीत्॥ किंकर्त्तव्यं
वनेतातनतत्त्वंवदविस्तरं॥७७॥ अंधकूपनिभेमोहेयथ
पंगुरहंशठः॥ कर्मणापतितोनित्यंमामुद्धरदयानिधे॥७
८॥ गोकर्णउवाच॥ देहेस्थिमांसरुधिरेभिमतिंत्यजत्वं॥
जायासुतादिषुसदाममतांजहीहि॥ पश्यपानिशंजगदि
दंक्षणभंगनिष्टंवैराग्यरागरसिकोभवभक्तिनिष्टः॥७९
धर्मंभजस्वसततंत्यजलोकधर्मान्सेवस्वसाधुपुरुषा॥
न्जहिकामतृष्णां॥ आनंत्यपारगुणचिंतनमाशुमुक्त्वा

अंधकूपेस्त्रेह
पापीवढ्धपंग
रहंशठः ३=

रामः
२९

सेवाकथारसमहोनितरांपिबत्वं॥८०॥एवंसुतोक्तिरस
तोपिगृहंविहाययातोवनंस्थिरमतिर्गतषष्टिवर्षः॥यु
क्तोहरेरनिशंतत्परिचर्ययासौश्रीकृष्णमापनियतंद
शमस्यपाठात॥८१॥इतिश्रीपद्मपुराणेउत्तरखंडेश्रीभा
गवतमाहात्म्यनिरूपणेविप्रमोक्षोनामचतुर्थोध्यायः॥४॥
सूतउवाच॥पितर्युपरतेतेनजननीताडिताभृशं॥क्व
वित्तंतिष्ठतिब्रूहिहिहनिष्येत्वंयानचेत॥१॥इतितद्वाक्यसं
त्रासाजनन्यापुत्रदुःखतः॥कूपेपातःकृतोरात्रौतेनसानि
धनंगता॥२॥गोकर्णस्तीर्थयात्रार्थंनिर्गतोयोगसंस्थित

स्नुदिनं ३

Digitized by Panjab Digital Library | www.panjabdigilib.org

नदुःखंनसुखंतस्यनवैरीनापिबांधवः॥३॥धुंधुकारी
गृहेतिष्टत्पंचपण्यवधूवृतः॥अत्युग्रकर्मकिर्त्ताचितत्पो
षणविमूढधीः॥४॥एकदाकुलटास्तास्तुभूषणान्यभि
लिप्सवः तदर्थंनिर्गतोगेहात्कामांधोमृत्युमस्मरन्॥५
यतस्ततश्चसंहृत्यवित्तंवेश्मपुनर्गतः॥ताभ्योयच्छत्सु
वस्त्राणिभूषणानिकियंतिच॥६॥बहुवित्तचयंदृष्ट्वारा
त्रौनार्योविचारयन्॥चौर्यंकरोत्यसौनित्यंअतोराजाग्र
हीष्यति॥७॥वित्तंहृत्वापुनश्चैनंमारयिष्यतिनिश्चितं॥अ
तोर्थगुप्तयेगूढमस्माभिःकिंनहन्यते॥८॥निहत्यैनंगृही

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्वार्थंयास्यामोयत्रकुत्रचित् ॥ इतितानिश्चयंकृत्वासुप्तं
संवध्मरश्मिभिः ॥ ९ ॥ पाशंकंठेनिधायास्पतन्मत्सुमुपच
क्रमुः ॥ त्वरितंनममारासौचिंतायुक्तास्ततोभवन् ॥ १० ॥ त
प्तांगारसमूहांश्चतन्मुखेहिविचिक्षिपुः ॥ अग्निज्वालाति
दुःखेनव्याकुलोनिधनंगतः ॥ ११ ॥ नंदेहंमुमुचुर्गर्त्तेप्रायः
साहसिकाःस्त्रियः नज्ञातंतद्रहस्यंतुकेनापीदंततदैवच १२
लोकैःपृष्टावदंतिस्मदूरंयातःप्रियोहिनः ॥ आगमिष्यति
सर्वेस्मिन्वित्तलोभेनकर्षिताः ॥ १३ ॥ स्त्रीणांनैवतुविश्वा
सोऽनतानांकारयेद्बुधः विश्वासेयःस्थितोमूढःसदुःखैः

भा॰मा॰
३१

परिभूयते॥१४॥सुधामयं वचोयासां कामीनां रसवर्द्धनं
हृदं पंचक्षुरधाराभं प्रियः कोनाम योषितां॥१५॥संहृत्य वि
त्तं ताःयाताः कुलटा बहुभर्तृकाः॥धुंधुकारी बभूवाथ महा
न्प्रेतः कुकर्मतः॥१६॥वात्यारू[illegible]धरो नित्यं धावन्दशदि
शोन्तरं॥शीतातपपरिक्लिष्टो निराहारः पिपासितः॥१७॥
नलेभे शरणं कुत्रहा दैवेति मुहुर्वदन्॥किंयत्कालेन गो
कर्णो मृतं लोकादवुध्यत॥१८॥अनाथं तं विदित्वैवं गया
श्राद्धमचीकरत्॥यस्मिन्तीर्थे तु संयाति तत्र श्राद्धं प्रव
र्तयत्॥१९॥एवं भ्रमन्स गोकर्णः स्वपुरं तदुपेयिवान्॥रा

राम:
३१

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्रौगेहांगणे स्वप्तुमागतो लक्षितः परैः ॥२०॥ तत्र सुप्तं स वि
ज्ञाय धुंधुकारी स्वबांधवं निशीथे दर्शयामास महारौद्र
तरं वपुः ॥२१॥ सकृन्मेषः सकृद्धस्ती सकृच्च महिषोभवत्
सकृदिंद्रः सकृच्चाग्निः पुनश्च पुरुषोभवत् ॥२२॥ वैपरी
त्यमिदं दृष्ट्वा गोकर्णो धैर्यसंयुतः ॥ अयं दुर्गतिकः कोपि
निश्चित्याथ तमब्रवीत् ॥२३॥ गोकर्ण उवाच ॥ कस्त्वमुग्र
तरो रात्रौ कुतो यातो दशामिमां किं वा प्रेतः पिशाचो वा
राक्षसोसीति शंस नः ॥२४॥ एवं पृष्टस्तदा तेन रुरोदोच्चैः
पुनः पुनः ॥ अशक्तो वचनोच्चारे संज्ञामात्रं चकार ह ॥२५॥

सू.तः

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा॰मा॰
३२

ततोंजलौ जलं कृत्वा गोकर्णस्तमुदीरयन ॥ तत्सेकाद्ग
तपापोसौ प्रवक्तुं मुपचक्रमे ॥ २६ ॥ प्रेतउवाच ॥ अहं भ्रा
तात्वदीयोस्मि धुंधुकारीतिनामतः ॥ स्वकीयेनैव दोषेण
ब्रह्मत्वं नाशितं मया ॥ २७ ॥ कर्मणो नास्ति मे संख्या महा
ज्ञाने विवर्त्तिनः ॥ लोकानां हिंसकः सोहं स्त्रीभिर्दुःखेन मा
रितः ॥ २८ ॥ अप्रप्रेतत्वमापन्नो दुर्दशां च वहाम्यहं ॥ वा
ताहारेण जीवामि दैवाधीनः फलोदयः ॥ २९ ॥ अहो बं
धो कृपासिंधो भ्रातर्मामाशु मोचय ॥ गोकर्णो वचनं श्रु
त्वा तस्मै वाक्यमथाब्रवीत ॥ ३० ॥ गोकर्णउवाच ॥ त्वद

रामः
३२

Digitized by Panjab Digital Library | www.panjabdigilib.org

पंचगयापिंडोमयादत्तोविधानतः॥तत्कथंनैवमुक्तो
सिममाश्चर्यमिदंमहत्॥२१॥गयाश्राद्धान्नमुक्तश्चेदुपा
यानांपरंत्विह॥किंविधेयंमयाप्रेततत्त्वंवदसविस्तरं॥२
२॥प्रेतउवाच॥गयाश्राद्धकृतेनापिमुक्तिर्मेनभविष्य
ति॥उपायंपरमंकिंचित्तद्विचारयसांप्रतं॥२३॥इतित
द्वाक्यमाकर्ण्यगोकर्णोविस्मयंगतः॥शतश्राद्धैर्नमु
क्तिश्चेदसाध्यंमोचनंतव॥२४॥इदानींतुनिजंस्थानमा
तिष्ठप्रेतनिर्भयं॥त्वन्मुक्तिसाधकंकिंचिदाचरिष्येविचा
र्यच॥२५॥धुंधुकारीनिजंस्थानंतेनात्तिष्ठस्ततोगतः॥गो

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा॰मा॰
३२
निष्टि

कर्णश्चिंतयामासतांरात्रिंनतदृध्यगात्॥३६॥प्रातःसमाग
तंदृष्ट्वालोकाःप्रीत्यासमागताः॥तत्सर्वंकथितंतेनयज्जातं
चयथातथा॥३७॥विद्वांसोयोगनिष्टाश्चवज्ञानिनोब्रह्मवादि
नः॥तन्मुक्तिंनैवपश्यंतिपश्यंतःशास्त्रसंचयान्॥३८॥ततः
सर्वैःसूर्यवाक्यंतन्मुक्त्यैस्थापितंपरं॥गोकर्णःस्तंभनंचक्रे
सूर्यवेगस्यवैतदा॥३९॥तुभ्यंनमोजगत्साक्षिन्ब्रूहिमेमु
क्तिहेतुकं॥तच्छ्रुत्वादूरतःसूर्यःस्फुटमित्यभ्यवादत॥४०॥ भाषत
श्रीमद्भागवतान्मुक्तिःसप्ताहंवाचनंकुरु॥इतिसूर्यवचःसर्वै
र्ध्वनिरूपंतुविश्रुतं॥४१॥सर्वैर्ब्रुवन्प्रयत्नेनकर्त्तव्यंसुकरंत्वि

रामः
३२

Digitized by Panjab Digital Library | www.panjabdigilib.org

हि ।। गोकर्णो निश्चयं कृत्वा वाचनार्थं प्रवर्त्तवान ।।४२।। श्रवणा
यततः सर्वे दिशाग्रामाज्जनाययुः ।। पंग्वंधवृद्धमंदाश्चतेपि
पापक्षपापवै ।।४३।। समारंभो भवत्तत्र देवविस्मयकारकः
यदैवासनमास्थाय गोकर्णोऽकथयत्कथां ।।४४।। सप्रेतोपि
तदायातः स्थानंपश्यन्नितस्ततः ।। सप्तग्रंथियुतंतत्रापश्यदूंश
समुच्छ्रितं ।।४५।। तन्मूलच्छिद्रमाविश्यश्रवणार्थंस्थितोप्यसौ
वातरूपीस्थितिंकर्तुंमशक्तोवंशमाविशत् ।।४६।। वैष्णवंब्रा
ह्मणंमुख्यंश्रोतारंपश्पतिस्थितः ।। प्रथमस्कंधतःस्पष्टमाख्या
नंवेणुतोकरोत् ।।४७।। दिनांतेरक्षितागाथातदाचित्रंवभूवह

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा॰मा॰
३४

वंशैकोग्रंथिभेदोभूत्सशब्दंपश्यतांसतां॥४८॥द्वितीयेह्नि
तथासायंद्वितीयग्रंथिभेदनं॥तृतीयेह्नितथासायंतृतीय
ग्रंथिभेदनं॥४९॥एवंसप्तदिनैर्वंशसमस्तग्रंथिभेदनं॥कृत्वा
पिद्वादशस्कंधश्रवणात्प्रेततांजहौ॥५०॥दिव्यरूपधरोजात
स्तुलसीदाममंडितः॥पीतवासाघनश्यामोमुकुटीकुंडला
न्वितः॥५१॥ननामभ्रातरंसद्योगोकर्णमितिचाब्रवीत्॥त्वया
हंमोचितोबंधोकृपयाप्रेतकश्मलात्॥५२॥धन्याभागवती
वार्ताप्रेतपीडाविनाशिनी॥सप्ताहोपितथाधन्यःकृष्णलो
कफलप्रदः॥५३॥कंपंतेसर्वपापानिसप्ताहश्रवणेस्थिते॥

राम:
३४

Digitized by Panjab Digital Library | www.panjabdigilib.org

अस्माकंप्रलयंसद्यःकथ्येयंचकरिष्यति॥५४॥आर्द्रंशुष्कंलघु
स्थूलंवाङ्मनःकर्मभिःकृतं॥श्रवणंविदहेत्पापंपावकःसमि
धोयथा॥५५॥अस्मिन्वैभारतेवर्षेसूरिभिर्द्विसंसदि॥अक
थ्याश्राविणांपुंसांनिष्फलंजन्मकीर्त्तितं॥५६॥किंमोहतोरक्षि
तेनसुपुष्टेनवलीयसा॥अध्रुवेणशरीरेणशुकशास्त्रकथां
विना॥५७॥अस्थिमेदानसावद्धंमांसशोणितलेपितं॥चर्माव
नद्धंदुर्गंधंपात्रंमूत्रपुरीषयोः॥५८॥जराशोकविपाकार्त्तरो
गमंदिरमातुरं॥दुःपूरंदुर्ध्रवंदुष्टंसदोषंक्षणभंगुरं॥५९॥
कृमिविड्भस्मसंज्ञांचैतंशरीरमितिवर्णितं॥अस्थिरेणास्थि

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा॰मा॰ रं कर्मकुतो यं साधयेन्नहि ॥६०॥ यत्प्रातः संस्कृतं चान्नं सायं त
३५ च्च विनश्यति ॥ तदीयरससंपुष्टे काये का नाम नित्यता ॥६१॥ स
प्ताहश्रवणाल्लोके प्राप्यते निकटे हरिः ॥ अतो दोषनिवृत्यर्थमे
तदेव च साधनं ॥६२॥ बुद्बुदा इव तोयेषु मशका इव जंतुषु ॥ जा
यंते मरणायैव कथाश्रवणवर्जिताः ॥६३॥ जडस्य शुष्कवंश
स्य यत्र ग्रंथिविभेदनं ॥ चित्रं किमु तदा चित्तग्रंथिभेदः कथाश्र
वात् ॥६४॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः ॥ क्षीयंते
सर्वकर्माणि सप्ताहश्रवणे कृते ॥६५॥ संसारकर्दमालेपप्रक्षा रामः
लनपटीयसी ॥ कथातीर्थे स्थिते चित्ते भक्तिरेव बुधैः स्मृता । ३५

Digitized by Panjab Digital Library | www.panjabdigilib.org

६६॥ एवंवदतिवैतस्मिन्विमानमपतत्तदा वैकुंठवासिभिर्युक्तंप्रस्फुरद्दीप्तिमंडलं॥६७॥ सर्वेषांपश्यतांभेजेविमानंधुंधुलीसुतः॥ विमानेवैष्णवान्वीक्ष्यगोकर्णोवाक्यमब्रवीत॥६८

गोकर्णउवाच॥ अत्रैववहवःसंतिश्रोतारोममनिर्मलाः॥ आनीतानिविमानानितेषांनयुगपत्कुतः॥६९॥ श्रवणंसमभागेनसर्वेषामिहदृश्यते॥ फलभेदःकुतोजातःप्रब्रुवंतुहरिप्रियाः॥७०॥ हरिदासाऊचुः॥ श्रवणस्यविभेदेनफलभेदोपिसंस्थितः॥ श्रवणंतुकृतंसर्वैर्नतथामननंकृतं॥७१॥ फलभेदस्ततोजातःसर्वेषांश्चएवतामिह॥ पुनःश्रावाद्गमिष्यंतिहरि

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा॰मा॰ लोकमितंस्त्विमे॥७२॥सप्तरात्रमुपोष्यैवप्रेतेनश्रवणंकृ
३६ तं॥मननादितथातेननस्थिरचित्तंकृतंभृशं॥७३॥अदृढंच
हतंज्ञानंप्रमादेनहतंश्रुतं॥संदिग्धोहिहतोमंत्रोव्यग्रचित्ते
हतोजपः॥७४॥अवैष्णवोहतोदेशोहतंश्राद्धमदक्षिणं॥ह
तमश्रोत्रियेदानंअनाचारहतंकुलं॥विश्वासोगुरुवाक्येषु
स्वस्मिन्दीनत्वभावना॥मनोदोषजयश्चैवकथायांनिश्च
लामतिः॥७५॥एवमादिकृतंचेत्स्यात्तदावैश्रवणेफलं॥प
नःश्रवांतेसर्वेषांवैकुंठेवसतिर्ध्रुवं॥७६॥गोकर्णेनतवगो रामः
विंदोगोलोकंदास्यतिस्वयं॥एवमुक्त्वाययुःसर्वेवैकुंठंहरिकी ३६

Digitized by Panjab Digital Library | www.panjabdigilib.org

र्त्तनाः॥७८॥श्रावणेमासिगोकर्णःकथामूचेतथापुनः सप्त
रात्रंव्रतीभूयश्रवणंतैःकृतंफलं॥७९॥कथासमाप्तौय
ज्जातंश्रूयतांतच्चनारद॥विमानैःसहभक्तैश्चहरिराविर्बभू
वह॥८०॥जयशब्दानमःशब्दास्तत्रासन्बहवस्तदा॥पांचज
न्यध्वनिंचक्रेहर्षात्तत्रहरिःस्वयं॥८१॥गोकर्णंतुसमालिंग्या
करोत्स्वसदृशंहरिः॥श्रोतॄनन्यान्घनश्यामान्पीतकौशे
यवाससः॥८२॥किरीटिनःकुंडलिनस्तथाचक्रेहरिःक्षणा
त्॥तद्ग्रामेयेस्थिताजीवाआश्वाचांडालाश्चजातयः॥८३॥वि
मानेस्थापितास्तेपिगोकर्णकृपयातदा॥प्रेषिताहरिलोके

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा॰मा॰ ३१ तेयत्रगच्छंतियोगिनः॥८४॥गोकर्णेनसगोपालोगोलोकं
गोपवल्लभं॥कथाश्रवणतःप्रीतोनिर्ययौभक्तवत्सलः।
८५॥अयोध्यावासिनःपूर्वंयथारामेणसंगताः॥तथाकृ-
ष्णेनतेनीतागोलोकंयोगिवल्लभं॥८६॥यत्रसूर्यस्यसोमस्य
सिद्धानांनुगतिःकदा॥तंलोकंहिगतास्तेतुश्रीमद्भागवतश्र
वात्॥८७॥ब्रूमोद्यतेकिंफलमेतदुज्ज्वलंसप्ताहयज्ञेनकथा
सुसंचितं॥कर्णेनगोकर्णकथाक्षरार्थैःप्रीताश्चतेगर्भगता
नभूयः॥८८॥वातांबुपर्णाशनदेहशोषणैस्तपोभिरुग्रै रामः
श्चिरकालसंचितैः॥योगैश्चसंयांतिनरानतांगतिंसप्ताह ३१

Digitized by Panjab Digital Library | www.panjabdigilib.org

गाथाश्रवणेनयांति॥८९॥इतिहाससमिमंपुण्यंशांडिल्योपि
मुनीश्वरः॥पठतेचित्रकूटस्थोब्रह्मानंदपरिप्लुतः॥९०॥आ
ख्यानमेतत्परमंपवित्रंश्रुतंसकृत्संनिदहेदघौघं॥श्राद्धेप्र
युक्तंपितृतृप्तिमावहेन्नित्यंसुपाठादपुनर्भवंच॥९१॥इतिश्री
पद्मपुराणेउत्तरखंडेश्रीभागवतमाहात्म्यनिरूपणेगो
र्णवर्णनंनामपंचमोध्यायः॥५॥कुमाराऊचुः॥अथतेसं
प्रवक्ष्यामःसप्ताहश्रवणेविधिं संहापूर्वासुभिश्चैवप्रायः सहायैर्वसुभि३
दैवज्ञंतु २= साध्योविधिःस्मृतः॥१॥संत्तसमूहंसमाहूयमुहूर्त्तंपृच्छ्ययत्नतः
विवाहेयादृशंवित्तंतादृशंपरिकल्पयेत्॥२॥नभस्यआश्वि

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा॰मा॰ नोर्ज्जौचिमार्गशीर्षः शुचिर्नभाः ॥ एतेमासाः कथारंभे श्रोतॄ
२८ णांमोक्षसूचकाः ॥ ३ ॥ मासानांविग्रहेयानि तानित्याज्यानिस
र्वथा ॥ सहायाश्चतत्र वात्रकर्त्तव्याः सोद्यमाश्चये ॥ देशेदेशे
यासेयंवार्त्ताप्रेष्याप्रयत्नतः ॥ भविष्यतिकथाचात्रआगं
तव्यंकुटुंबिभिः ॥ ५ ॥ दूरेहरिकथाः केचिद्दूरेचाच्युतकीर्त्तना
स्त्रियः शूद्रादयोयेचतेषांबोधोयतोभवेत् ॥ ६ ॥ देशेदेशेवि
रक्तायेवैष्णवाः कीर्त्तनोत्सुकाः ॥ तेष्वेवपत्रंप्रेष्यंचतल्लेख
नमितीरितं ॥ सतांसमाजोभवितासप्तरात्रंसुदुर्लभः ॥ अपू राम:
र्वरसरूपैवकथाचात्रभविष्यति ॥ ८ ॥ श्रीभागवतपीयूष २८

Digitized by Panjab Digital Library | www.panjabdigilib.org

पानायरसलंपटाः॥ भवंतश्चनदाशीघ्रमायांतुप्रेमतत्प
राः॥९॥नात्रकाशाःकदाचिद्वैदिनमात्रंतथापितु॥सर्वथा
गमनंकार्यंत्त्रणोत्रैवसुदुर्लभः॥१०॥एवमावरणंतेषां
कर्त्तव्यंविनयेनच॥आगंतुकानांसर्वेषांवासस्थानानिक
ल्पयेत॥११॥तीर्थेवापिवनेवापिगृहेवाश्रवणंमतं॥वि
शालावसुधायत्रकर्त्तव्यंतत्कथास्थलं॥१२॥शोधनंमा
र्जनंभूमेर्लेपनंधातुमंडनं गृहोपस्करमुद्धृत्यगृहकोणे
निवेशयेत॥१३॥अर्वाक्पंचाहृतोयत्नादासीर्णनिप्रमे
लयेत॥कर्त्तव्योमंडलःप्रोच्चैःकदलीखंडमंडितः॥१४॥फ

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा॰मा॰ ३९ लपुष्पदलैर्विष्वक्वितानेनविराजितः॥चतुर्दिक्षुध्वजारो
पोवहुसंपद्विराजितः॥१५॥ऊर्द्ध्वंसप्तैवलोकाश्चकल्पनी
याःप्रयत्नतः॥तेषुविप्राविरक्ताश्चस्थापनीयाःप्रबोध्य
च॥१६॥पूर्वंतेषामासनानिकर्त्तव्यानियथोत्तरं॥वक्तुश्चा
पितदादिव्यमासनंकल्पयेत्पुरा॥१७॥उदङ्मुखोभवेद्व
क्ताश्रोतारःप्राङ्मुखास्तदा॥अथवापूर्वदिग्ज्ञेयापूज्यपू
जकमध्यतः॥१८॥श्रोतृणामागमेप्रोक्तादेशकालादिको
विदैः॥विरक्तोवैष्णवोविप्रोवेदशास्त्रविशुद्धिकृत॥१९॥ रामः
दृष्टांतकुशलोधीरोवक्ताकार्योतिनिस्पृहः॥२०॥अनेक ३९

Digitized by Panjab Digital Library | www.panjabdigilib.org

दि

धर्मविभ्रांताः स्त्रैणाः पाषंडवासिनः ॥ शुकशास्त्रकथोच्चा
रेत्साज्यास्तेयदि पंडिता ॥ २१ ॥ वक्तुः पार्श्वे सहायार्थमन्ये
स्थाप्यास्तथाविधाः ॥ पंडिताः संशयछेत्तलोकवोधनतत्प
रः ॥ २२ ॥ वक्ताह्नोरंप्रकर्त्तव्यदिनादर्वाक्व्रताप्तये ॥ अरु
णोदयेसौनिर्वर्त्यम्प्रोचस्नानंसमाचरेत ॥ २३ ॥ नित्यंसंक्षे
पतः कृत्वासंध्याद्यंसंप्रयत्नतः ॥ कथाविघ्नविघातायगण
नाथंप्रपूजयेत ॥ २४ ॥ पितॄन्संतर्प्यशुद्ध्यर्थंप्रायश्चित्तंसमा
चरेत ॥ मंडलंचप्रकर्त्तव्यंतत्रस्थाप्योहरिस्तथा ॥ २५ ॥ कृष्णमु
द्दिश्यमंत्रेणचरेत्पूजाविधिंक्रमात ॥ प्रदक्षिणनमस्कारान्

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा॰मा॰
४०

पूजांतेस्तुतिमाचरेत् ॥२८॥ संसारसागरेमग्नंदीनंमांकरु
णानिधे॥ कर्मग्राहगृहीतांगंमामुद्धरभवार्णवात् ॥२७॥ श्री
मद्भागवतस्यापिततःपूजाप्रयत्नतः कर्त्तव्याविधिनाप्रीत्या
धूपदीपसमन्विता॥२८॥ ततस्तुश्रीफलंदत्वानमस्कारंस
माचरेत्॥स्तुतिःप्रसन्नचित्तेनकर्त्तव्याकेवलंतदा॥२९॥
श्रीमद्भागवताख्यस्त्वंप्रत्यक्षःकृष्णएवहि॥स्वीकृतोसिमया
नाथमुक्त्यर्थंभवसागरे॥३०॥ मनोरथोमदीयोयंसफलः
सर्वथात्वया॥निर्विघ्नेनैवकर्त्तव्योदासोहंतवकेशव॥३१॥
एवंदीनंवचःप्रोच्यवक्तारंचाप्यपूजयेत् संभूष्यवस्त्रभू

रामः
४०

Digitized by Panjab Digital Library | www.panjabdigilib.org

षाभिः पूजां तेतं च संस्तुवे ॥ २२ ॥ शुकरूपप्रवो धर्म्म सर्वशा
स्त्रविशारद ॥ एतत्कथाप्रकाशेन मदृज्ञानं विनाशय ॥ २३ ॥
तदृयेन नियमः पश्चात्कर्त्तव्यः श्रेयसे मुदा ॥ सप्तरात्रं यथाशा
स्त्राधारणीयः स एव हि ॥ २४ ॥ वरणं पंच विप्राणां कथाभं
गनिवृत्तये ॥ कर्त्तव्यं तैर्हरेर्जाप्यं द्वादशाक्षरविद्यया ॥ २५ ॥ ब्रा
ह्मणान्वैष्णवांश्चान्यान्तथा कीर्तनकारिणः ॥ नत्वा संपू
ज्य दत्ताज्ञः स्वयमासनमाविशेत् ॥ २६ ॥ लोकवित्तधनागार
पुत्रचिंतां व्युदस्य च ॥ कथाचित्तः शुद्धमतिर्लभते फलमुत्तमं
२७ ॥ आसूर्योदयमारभ्य सार्द्धत्रिप्रहरांतकं ॥ वाचनीया कथा

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा०मा० सम्यग्धीरकंठसुधीमता ॥ ३८ ॥ कथाविरामः कर्त्तव्यो मध्या
४१ न्हे घटिकाद्वयं ॥ तत्कथामनुकार्यं वै कीर्त्तनं वैष्णवैस्तदा ॥
३९ ॥ मलमूत्रजलाद्यं हि लघ्वाहारः सुखावहः हविष्यान्नेन
कर्त्तव्यो ह्येकवारं कथार्थिनिः ॥ ४० ॥ उपोष्य सप्त रात्रं वै शक्ति
श्चेच्छृणुयात्तदा ॥ घृतपानं पयःपानं कृत्वा च शृणुयात्सुखं
४१ ॥ फलाहारेण वाश्राव्यं एकभक्तेन वा पुनः ॥ सुखसाध्यं
भवेद्यत्तु कर्त्तव्यं श्रवणाय तत् ॥ ४२ ॥ भोजनं तु वरं मन्ये क
थाश्रवणकारणं ॥ नोपवासो वरः प्रोक्तः कथाविघ्नकरो रामः
यदि ॥ ४३ ॥ सप्ताहव्रतिनां पुंसां विनयान्शृणु नारद ॥ विष्णु ४१

Digitized by Panjab Digital Library | www.panjabdigilib.org

दीक्षाविहीनानांनाधिकारःकथाश्रवे ॥४४॥ ब्रह्मचर्यमध
सुप्तिःपत्रावल्यांचभोजनं ॥ कथासमाप्तौभुक्तिंचकुर्यान्नि
त्यंकथाव्रती ॥४५॥ द्विदलंमधुतैलंचगरिष्टान्नंतथैवच ॥
भावदुष्टंपर्युषितंजह्यान्नित्यंव्रतीभुजि ॥४६॥ वृंताकंचक
लिंगंचदग्धमन्नंमसूरिकां ॥ निष्पावानामिषाद्यंचवर्जये
त्कथाव्रती ॥४७॥ पलांडुलशुनंहिंगुंमूलकंगृंजनंतथा ॥ना
लिकामूलकूष्मांडंनैवाद्याच्चकथाव्रती ॥४८॥ कामंक्रोधं
मदंमानंमत्सरंलोभमेवच दंभंमोहंतथाद्वेषंदूरतोवर्ज
येद्व्रती ॥४९॥ रजस्वलांत्यजम्लेछपतितान्व्रातिकैस्तथा ॥
वेदवैष्णवविप्राणांगुरुगोवृत्तिनांतथा स्त्रीराजमहतांनिंदांवर्जयेद्यःकथाव्रत

Digitized by Panjab Digital Library | www.panjabdigilib.org

द्विजद्विट् वेदवाद्यैश्च नवं देयः कथाव्रती ॥५०॥ सत्यं शौचं द
यामौनं मार्ज्जवं विनयं सदा ॥ नदारं मानसं तद्वद्देवं कुर्यात्क
थाव्रती ॥५१॥ दरिद्रश्चक्षयी रोगी निर्भाग्यः पापकर्मवान्
अनपत्यो मोक्षकामः शृणुयात्सकथामिमां ॥५२॥ अपुष्प
काकवंध्या च वंध्या या च मृतार्भका ॥ श्रवद्गर्भा च या नारी त
याश्राव्या प्रयत्नतः ॥५३॥ एतेषु विधिना दत्तं तच्च शुभकरं
भवेत् ॥ अस्तुत्तमा दिनाः सप्तकोटियज्ञफलप्रदाः ॥५४॥ एवं
कृत्वाव्रतविधिमुद्यापनमथाचरेत् ॥ जन्माष्टमीव्रतमिव
कर्त्तव्यं फलकांक्षिभिः ॥५५॥ अकिंचेषु भक्तेषु प्रायो नोद्याप

नाग्रहः॥ श्रवणेनैव पूतास्ते निष्कामा वैष्णवा यतः॥५६॥ एवं
नंगादृयत्नेस्मिन्समासे श्रोतृभिस्तदा॥ पुस्तकस्य च वक्तुश्च
पूजा कार्यातिभक्तितः॥५७॥ प्रसादमनसा माला श्रोतृभिश्चा
प्यप्रदीयतां॥ मृदंगतालललसितं कीर्त्तनं कीर्त्यतां ततः॥५८
जयशब्दो नमः शब्दः शंखशब्दश्च गीयतां॥ विप्रेभ्यो वाचके
भ्यश्च वित्तमन्नं च दीयतां॥५९॥ विरक्तश्चेद्भवेच्छ्रोता गीता
वाच्या परेहनि॥ गृहस्थश्चेत्तदा होमः कर्त्तव्यः कर्मशांतये॥६०
प्रतिश्लोकं च जुहुयाद्विधिना दशमस्य च॥ पायसं मधुसर्पि
श्च तिलान्नादिभिः संयुतं॥६१॥ अथवा हवनं कुर्याद्गायत्र्यासु

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा॰मा॰ समाहितः॥ तन्मयत्वात्पुराणस्य परमस्यास्य तत्त्वतः॥ ६२
४२ होमशक्तौ बुधो होमं दद्यात्तत्फलसिद्धये॥ नानाछिद्रनिरो
धार्थं न्यूनताधिकतारम्भयोः॥ ६३॥ दोषयोः प्रशमार्थं च पठे
न्नामसहस्रकं॥ तेन स्यात्सफलं सर्वं नास्त्यस्मादधिकं यतः
६४॥ द्वादश ब्राह्मणान्पश्चाज्जोजयेन्मधुपायसैः॥ दद्यात्सु
वर्णं धेनुं च व्रतपूर्णत्वसिद्धये॥ ६५॥ शक्तौ पलत्रयमितं स्व
र्णसिंहं विधाय च॥ तत्रास्य पुस्तकं स्थाप्य लिखिताललिता
क्षरं॥ ६६॥ संपूज्यावाहनाद्यैस्तदुपचारैः सदक्षिणं॥ वस्त्रभू राम:
षणगंधाद्यैः पूजिताय यतात्मने॥ ६७॥ आचार्यायसुधीर्द ४२

त्वामुक्तःस्याद्भवबंधनैः॥ एवंकृतविधानेनसर्वपापनिवार
णो॥ ६८॥ फलदंस्यात्पुराणंतुश्रीमद्भागवतंशुभं॥ धर्मार्थका
ममोक्षाणांसाधनंनात्रसंशयः॥ ६९॥ इतितेकथितंसर्वंकिंभू
यःश्रोतुमिच्छसि॥ श्रीमद्भागवतेनैवभुक्तिर्मुक्तिःप्रकाशिता।
७०॥ सूतउवाच॥ इत्युक्त्वातेमहात्मानःप्रोचुर्भागवतीकथां
सर्वपापहरांपुण्यांभुक्तिमुक्तिप्रदायिनीं॥ ७१॥ शृण्वतांसर्व
भूतानांसप्ताहंनियतात्मनां॥ यथाविधिततोदेवंतुष्टुवुःपु
रुषोत्तमं॥ ७२॥ तदंतेज्ञानवैराग्यभक्तीनांपुष्टतापरा॥ तारु
ण्यंपरमंचाभूत्सर्वलोकमनोहरं॥ ७३॥ नारदश्चकृतार्थोऽभू

Digitized by Panjab Digital Library | www.panjabdigilib.org

त्सिद्धे स्वीये मनोरथे ॥ पुलकावृतसर्वांगः परमानंदसंभृतः ७
४ ॥ एवंकथांसमाकर्ण्यनारदोभगवत्प्रियः ॥ प्रेमगद्गदयावाचा
तानुवाचकृतांजलिः ॥ ७५ ॥ नारद उवाच ॥ धन्योस्म्यनुगृहीतो
स्मिभवद्भिःकरुणापरैः ॥ अद्यभागवताल्लब्धःसप्राहेनिकटे
हरिः ॥ ७६ ॥ श्रवणंसर्वधर्मेभ्योवरंमन्येतपोधनाः ॥ वैकुंठस्थो
यतःकृष्णःश्रवणाद्यस्यलभ्यते ॥ ७७ ॥ सूत उवाच ॥ एवंबदति
वैतत्रनारदेवैष्णवोत्तमे ॥ परिभ्रमन्समायातःशुकोयोगेश्व
रस्तदा ॥ ७८ ॥ ततोवयःषोडशवार्षिकःसव्यासात्मजोज्ञान
महाब्धिचंद्रमाः ॥ कथारसालेनिजलाभपूर्णःप्रेमणापठन्म

Digitized by Panjab Digital Library | www.panjabdigilib.org

गवतंशनैःशनैः ॥ ७९ ॥ दृष्ट्वासदस्याःपरमोरुतेजसंस
द्यःसमुत्थायददुर्महासनं ॥ प्रीत्यामुरर्षिस्तमपूजयत्सुखं
स्थितोवदत्संश्रृणुतामलांगिरं ॥ ८० ॥ शुक उवाच ॥ निग
मकल्पतरोर्गलितंफलंशुकमुखादमृतद्रवसंयुतं ॥ पि
वतभागवतंरसमालयंमुहुरहोरसिकाभुविभावुकाः ॥ ८
१ ॥ धर्मःप्रोज्झितकैतवोत्रविहितोनिर्मत्सराणांसतांवेद्यं
वास्तवमत्रवस्तुशिवदंतापत्रयोन्मूलनं ॥ श्रीमद्भागव
तेमहामुनिकृतेकिंवापरैरीश्वरःसद्योहृद्यवरुध्यतेत्र
कृतिभिःशुश्रूषुभिस्तत्क्षणात् ॥ ८२ ॥ श्रीमद्भागवतंपु

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा.मा. ४५ राणतिलकंयद्वैष्णवानांधनंयस्मिन्पारमहंस्यमेव

ममलंज्ञानंपरंगीयते॥ यत्रज्ञानविरागभक्तिसहितंनै

ष्कर्म्यमाविष्कृतंतच्छृण्वन्विपठन्विचारणपरोभक्त्या

विमुच्येन्नरः॥८२॥ स्वर्गेसत्येचकैलाशेवैकुंठेनास्त्ययं

रसः॥ अतःपिबंतुसद्भाग्यामामामुंचंतुकर्हिचित॥८४

सूतउवाच॥ इतिब्रुवाणेसतिबादरायणौमध्येसभं

श्रीहरिराविरासीत॥ प्रह्लादबल्युद्धवफाल्गुणादिभि

र्वृतंसुरर्षिस्तमपूजयच्चतान॥८५॥ दृष्ट्वाप्रसन्नंमह राम: ४५

दासनेहरिंतेचक्रिरेकीर्त्तनमग्रतस्तदा॥ भवोभवान्या

Digitized by Panjab Digital Library | www.panjabdigilib.org

कमलासनः सुतैः तत्रागमन्कीर्त्तनदर्शनोत्सुकाः ॥८६॥
प्रह्लादस्तालधारी तरलगतितया चोद्धवः कांश्यधारी वी
णाधारी सुरर्षिस्स्वरकुशलतया रागकर्त्तार्जुनोभूत् ॥ इंद्रो
वादीन्मृदंगं जयजयसुकराः कीर्त्तने भूत्कुमारायत्राग्रेभा
ववक्ता रसविरचनया व्याससपुत्रोवभूव ॥८७॥ ननर्त्तमध्ये
त्रिकमेवतत्र भक्त्यादिकानां नटवत्सुतेजसां ॥ अलौकिकं
कीर्त्तनमेतदीक्ष्य हरिः प्रसन्नोपि वचोब्रवीत्ततः ॥८८॥ मत्तो
वरं भागवता वृणुध्वं प्रीतोनिशं कीर्त्तनतोस्मि सांप्रतं ॥ श्रु
त्वेति तद्वाक्यमतिप्रसन्नाः प्रेमार्द्रचित्ता हरिमूचिरे ते ॥८९

Digitized by Panjab Digital Library | www.panjabdigilib.org

भा॰मा॰ ४६

नगाहृगाथासुचसर्वभक्तैरभिस्त्वयाभाव्यमितिप्रयत्नात्
मनोरथोयंपरिपूरणीयस्तथेतिचोक्त्वांतरधीयताच्युतः
९०॥ ततोमनस्तच्चरणेषुनारदस्तथाशुकादीनपितापसां
श्च॥ अथप्रहृष्टाःपरिनष्टमोहाःसर्वेययुःपीतकथामृतास्ते
९१॥ भक्तिःसुताभ्यांसहरक्षितासाशास्त्रेस्वकीयेपितदाशु
केन॥ ततोहरिर्भागवतस्यसेवनाच्चित्तंसमायातिहिवैष्णवा
नां॥९२॥ दारिद्र्यदुःखज्वरदाहितानांमायापिशाचीपरिम
र्दितानां॥ संसारसिंधौपतितानांक्षेमायवैभागवतं
प्रगर्जति॥९३॥ शौनकउवाच॥ शुकेनोक्तंकदाराज्ञेगोक

राम: ४६

ऐनि कदापुनः॥ सुरर्षयि कदाब्राह्मेष्मिंधिमे संशयंछि
दं॥९४॥ सूतउवाच॥ आकृष्णनिर्गतात्रिंशद्वर्षाविधि
गतेकलौ॥ नवमीतोनभस्येचकथारंभंशुकोकरोत॥९५
परीक्षितिछ्रुवणांतेचकलेर्वर्षशतद्वये॥ शुद्धेशुचौनवम्यां
चधेनुजोकथयत्कथां॥९६॥ अस्मत्दादिकलौयातेत्रिंश
तंसशतार्द्धकं॥ ऊर्जेशितेपच्छेनवम्यांब्रह्मणःसु
ताः॥९७॥ इत्येतत्तेसमाख्यातंयत्पृष्टोहंत्वयानघ॥कलौ
भागवतीवार्त्ताभवरोगविनाशिनी॥९८॥ कृष्णप्रियसक

Digitized by Panjab Digital Library | www.panjabdigilib.org

लकल्मषनाशनं च मुक्त्यैकहेतुमिह भक्तिविलासकारं
।संतःकथामृतमिदं पिबतादरेण लोके हितार्थपरिशी
लनसेवया किं ॥९९॥ स्वपुरुषमभिवीक्ष्य पाशहस्तं वद
ति यमः किल तस्य कर्णमूले ॥ परिहर भगवत्कथासुमत्ता
न्प्रभुरहमन्यनृणां न वैष्णवानां ॥१००॥ असारे संसारे वि
षयविषसंगाकुलधियः क्षणार्द्धं क्षेमार्थं पिबत शुकगाथ
तुलसुधां ॥ किमर्थं भवसिंधौ व्रजत कुपथे कुत्सितधियः
परीक्षित्साक्षी यच्छ्रवणगतमुक्त्युक्तिकथने ॥१०१॥ रस

Digitized by Panjab Digital Library | www.panjabdigilib.org

प्रवाहसंस्येन श्री शुकेनेरिता कथा॥ कंठे संवध्यते येन स
वैकुंठप्रभुर्भवेत्॥१०२॥ इति च परमगुह्यं सर्वसिद्धांतसिद्धं
सपदि निगदितं ते शास्त्रपुंजं विलोड्य॥ जगति शुककथातो
निर्मलं नास्ति किंचित्परिसरसुखहेतोर्द्वादशस्कंधसारं
१०३॥ यश्चैनां नियततया शृणोति भक्त्या यश्चैनां कथयति
शुद्धवैष्णवाग्रे॥ तौ सम्यग्विधिकरणात्फलं लभेते याथार्थ्य
न्न हि भुवने किमप्यसाध्यं॥१०४॥ परमिदमितिहासं पावनं
तीर्थवृत्तं वृजिनगणवियुक्तो यः शृणोतीह नित्यं॥ स भव

Digitized by Panjab Digital Library | www.panjabdigilib.org

तिखलुपूर्णःसर्वकामैरभिष्टैर्लभतिचसुरलोकंपूर्णत
त्वार्थसिद्धिं॥१०५॥यःपादमप्यत्रपठेत्सपापाद्विमुच्यते
जन्मसहस्रजातात॥दिनेदिनेपापचयंप्रकुर्वन्पठन्नरः
श्लोकमपीहभक्त्या॥१०६॥योनरःश्रृणुयाद्वापिश्रावये
द्वापिभक्तितः॥इहलोकेसुखंप्राप्तिपरलोकेपिमोक्षदा
१०७॥अश्वमेधसहस्राणिवाजपेयशतानिच॥कन्याको
टिसहस्राणिफलमेतत्त्वदानतः॥१०८॥इतिश्रीपद्मपु
राणेउत्तरखंडे[illegible]भागवतमाहा[illegible]निरूपणेश्रवणोवि

भा॰मा॰
४९



धिकघनेनामषष्ठोऽध्या
यः॥ ६॥ लिखितंमिश्रकन
हीरामेण॥पठनार्थंमिश्र
जीश्रीवृजभूषणजी॥ १॥



राम:
४९

Digitized by Panjab Digital Library | www.panjabdigilib.org





Digitized by Panjab Digital Library | www.panjabdigilib.org

Digitized by Panjab Digital Library | www.panjabdigilib.org